कथासाहित्यम्

४

वेतालपञ्चविंशतिः-१

प्रस्तावना

संस्कृतवाङ्मये कथाग्रन्थानाम् महत् स्थानम् वर्तते। कथाग्रन्थः आख्यायिका इति शब्देनापि व्यवह्रियते। प्रवृत्तिभेदात् आख्यानसाहित्यस्य भागद्वयम् भवति। उपदेशात्मकपशुकथा अथवा नीतिकथा, लोककथा अथवा मनोरञ्जककथा। नीतिकथासु उपदेशप्रवृत्तिः प्रधानम् भवति। लोककथासु तु मनोरञ्जनप्रवृत्तिः। पुनः लोककथासु प्रायः पात्ररूपेण मनुष्याः भवन्ति। यथा वेतालपञ्चविंशतिः। नीतिकथासु तु पशुपक्षिणः। यथा पञ्चतन्त्रम्। वेतालपञ्चविंशतिः इति ग्रन्थस्य कर्ता शिवदासः इत्युच्यते। एतासाम् कथानाम् पठनेन अस्माकं बोधमोदौ भवतः। कथासरित्सागरः, बृहत्कथामञ्जरी, भोजप्रबन्धः, पञ्चतन्त्रम्, कथामुक्तावली, कथामञ्जरी, जातकमाला वेतालपञ्चविंशतिः इत्यादयः कथाग्रन्थेषु अग्रगण्याः। अस्मिन् पाठे वेतालपञ्चविंशतिनामकग्रन्थात् कथे प्रस्तूयेते। ते कथे पठित्वा भवतामपि मनोरञ्जनम् किञ्च कर्तव्याकर्तव्यविवेकः अपि स्यात्।

उद्देश्यानि

इमं पाठं पठित्वा भवन्तः

- संस्कृतकथास्वारस्यं ज्ञास्यन्ति।
- विशेषणानां प्रयोगप्रकारान् अवगच्छन्ति।
- विविधानि तिङन्तपदानि ज्ञास्यन्ति।
- सन्धिसमासादिव्यवहारान् जानीयुः।
- विविधनीतीः उपदेशान् च स्वजीवने परिपालयितुं प्रभवेयुः।
- सर्वोपरि कथाः पठित्वा आनन्दम् लप्स्यन्ते।

४.१) कोऽनङ्गरतिपतिः

४.१.१) कथामुखम्

क्षान्तिशीलः इति कश्चित् धूर्तः भिक्षुः राजानम् त्रिविक्रमसेनम् (विक्रमादित्यम्) वेतालाय उपहाररूपेण प्रयच्छन् महतीम् विद्याधरसमृद्धिम् प्राप्तुम् इच्छन् च राज्ञे विक्रमादित्याय प्रत्येकम् दिने फलम् एकम् ददाति स्म। वस्तुतः तत् फलम् रत्नम् एव आसीत्। कालेन राजा एवंविधदानादिना सन्तुष्टः मुग्धः च सन् भिक्षुम् पृष्टवान् किमर्थम् एतत् मूल्यवत् उपढौकनम् दीयते। तदा भवतः साहाय्यम् आवश्यकम् इति कथयित्वा स भिक्षुः राजानम् विक्रमादित्यं श्मशानं प्रति प्रेषितवान् वेतालस्य आनयनार्थम्। विक्रमादित्यः श्मशानं गत्वा वेतालं शिंशपावृक्षे दृष्टवान्। ततः निर्भयेन सः तं वेतालम् आदाय भिक्षुसमीपम् आगच्छन् आसीत्। तदा वेतालः उक्तवान् - "राजन्, त्वं निष्प्रयोजनम् एवं कार्ये रतः असि। त्वया मार्गक्लेशः यथा नानुभूयेत तथा मार्गविनोदनीं कथां श्रावयामि। कथानन्तरं प्रश्नमेकं प्रक्ष्यामि। यदि उत्तरं जानतापि भवता असाधु उच्यते तर्हि भवतः मृत्युः स्यात्। यदि सम्यग् दीयते तर्हि अहं पुनः शिंशपावृक्षं गमिष्यामि"इति। एवं राजा तत्पृष्टस्य प्रश्नस्य उत्तरं ददाति। तदा वेतालः पुनः शिंशपावृक्षं प्रति गच्छति। राजा पुनः तम् आनेतुम् गच्छति। आनयनकाले पुनः कथारम्भः। पुनः प्रश्न–उत्तर–वेतालगमनानि। अन्ते राज्ञा वेतालहननेन ग्रन्थस्य परिसमाप्तिः।

४.१.२) पूर्वपीठिका

अर्थो हि कन्या परकीया एव। अर्थात् न्यासरूपेण स्थापितः अर्थः यथा अपरस्य तथैव पितृक्रोडे न्यासरूपेण स्थापिता कन्या अपि पत्युः एव। तत्र कन्यासम्प्रदानात् परम् पितुः तदुपरि स्वत्वं न तिष्ठति। तस्मात् भारतीयपरम्परायाम् कन्यादानस्य महत्स्थानं वर्तते। योग्यं वरम् अन्विष्य तस्मै पिता स्वस्य कन्यां सम्प्रददाति। एतेन यथा पुत्र्याः सुखं भवति तथैव पितुः अपि पुण्यं भवति। अस्यां कथायां तादृशम् एव कन्यादानं वर्णितम्। अत्र कन्यां स्वपत्नीरूपेण प्राप्तुं ब्राह्मणः क्षत्रियः वैश्यः शूद्रः च आगताः। तेषु कस्मै कन्या देया पित्रा इति बोधयितुम् एव वेतालः इमां कथां विक्रमादित्याय श्रावितवान्।

४.२) मूलपाठः

४.२.१) विभागः १

स राजा शिंशपान्तिकं गत्वा तं वेतालं स्कन्धेनादाय प्रस्थितस्तेन वेतालेन प्राग्वदभ्यधायि- "राजन्, कथमस्मिन् श्मशाने निशि ते एतादृक् प्रयासः। भूतसङ्कुलं रात्रिभीषणं चिताधूमैरिव ध्वान्तैर्निरुद्धं पितृकाननं किं नेक्षसे। तस्य भिक्षोरनुरोधतः कथमीदृशा प्रयासेन आत्मानं खेदयसि। तदिमं मे प्रश्नं मार्गविनोदकं शृणु-

अवन्तीषु देवनिर्मिता शैवी तनुरिव उद्दामभोगभूतिविभूषिता पद्मावती भोगवती हिरण्यवतीति च कृतादिषु त्रिषु युगेषु पुरी क्रमशः आसीत्। कलौ च उज्जयिनीति पुरी अस्ति, तस्यामासीद् वीरदेवो नाम नृपतिः, तस्य पद्मरतिनाम्नी महादेवी आसीत्।

व्याख्या

सः राजा विक्रमादित्यः शिंशपान्तिकं शिंशपावृक्षस्य अन्तिकम् समीपम्, गत्वा तं वेतालं स्कन्धेन आदाय स्वीकृत्य, प्रस्थितः चलितः। तेन वेतालेन प्राग्वद् पूर्ववद्, अभ्यधायि उक्तम् - राजन् महाराज, कथम् कुतः, अस्मिन् श्मशाने दाहस्थाने, निशि रात्रौ ते तव, एतादृक् एवंविधः, प्रयासः यत्नः। भूतसङ्कुलं भूतपिशाचादिव्याप्तम्, रात्रिभीषणं रात्रौ भीषणाकारम्, चिताधूमैः चिताभस्मैः, इव ध्वान्तैः अन्धकारैः, निरुद्धं व्याप्तम्, पितृकाननं पूर्वपुरुषविहारस्थानम्, किं नेक्षसे किं त्वं न पश्यसि। तस्य भिक्षोः तापसस्य, अनुरोधतः अनुरोधवशात्, कथम् ईदृशा एवंविधेन, प्रयासेन यत्नेन, आत्मानं स्वम्, खेदयसि तापयसि। तद् तस्मात् इमं मे प्रश्नं मार्गविनोदकं मार्गश्रान्त्यपहारकम् शृणु आकर्णय कथाम् शृणु इति तात्पर्यम्।

अवन्तीषु उज्जयिनीनगरेषु, देवनिर्मिता दैवसम्पद्भरिता, शैवी तनुः शिवस्य शरीरमिव, उद्दामभोगभूतिविभूषिता उद्धतसर्पेण भस्मना च शोभितं शिवस्य शरीरम् इव, पद्मावती भोगवती, हिरण्यवती इति च कृतादिषु चतुर्षु युगेषु पुरी नगरी क्रमशः शनैः शनैः आसीत्। उद्दामभोगभूतिविभूषिता शैवी तनुः इव कृतादिषु त्रिषु युगेषु क्रमशः उद्यामभोगभूतिविभूषिता देवनिर्मिता पद्मावती, भोगवती, हिरण्यवती इति पुरी आसीत् इत्यन्वयः। कलौ च उज्जयिनी इति पुरी अस्ति। तस्याम् नगर्याम् आसीत् वीरदेवः नाम नृपतिः राजा, तस्य राज्ञः पद्मरतिनाम्नी महादेवी महाराज्ञी आसीत्।

सरलार्थः

राजा शिंशपावृक्षात् वेतालं नीत्वा भिक्षोः सकाशं गच्छन् आसीत्। तदा स वेतालः राजानं पृष्टवान् यत् कथं सः राजा भूतपिशाचादिव्याप्तं श्मशानम् आगत्य एवं प्रयासं करोति। कथं सः भिक्षोः अनुरोधात् कार्ये व्यस्तः। ततः परं सः वेतालः कथां श्रावितवान्।

पुरा उज्जयिनी इत्याख्या नगरी आसीत्। सा नगरी भगवतः महादेवस्य देहवत् भोगविलासेन सम्पत्त्या सह विभूषिता आसीत्। तस्याः सत्ययुगे पद्मावती इति नाम, त्रेतायुगे भोगवती इति नाम, द्वापरयुगे हिरण्यवती इति नाम आसीत्। कलियुगे च तस्याः एव नगर्याः उज्जयिनी इति नाम। तत्र वीरदेवः इति नामकः राजा आसीत्। तस्य पत्न्याः नाम आसीत् पद्मरतिः इति।

व्याकरणविमर्शः

१) शिंशपान्तिकम् - शिंशपायाः अन्तिकम्, षष्ठीसमासः।

२) चिताधूमैः - चितायाः धूमः, तैः इति षष्ठीसमासः।

३) उद्दामभोगभूतिविभूषिता - उद्दामश्चासौ भोगश्चेति उद्दामभोगः, उद्दामभोगश्च भूतिश्च उद्दामभोगभूती, उद्दामभोगभूतिभ्यां विभूषिता उद्दामभोगभूतिविभूषिता।

४) ईक्षसे- ईक्ष दर्शने इति आत्मनेपदिनः धातोः लटि मध्यमपुरुषैकवचने रूपम्।

४.२.२) विभागः २

एकदा राजा तया साकं मन्दाकिनीतटे पुत्रकाम्यया तपसा हरमाराधयामास, चिरञ्च तपश्चरन् कदाचित् परितुष्टशङ्करोदिताम् आकाशवाणीं शुश्राव- "राजन्, उत्पत्स्यते ते पुत्रः शूरः कुलोद्वहः, कन्या चैका लावण्येन जिताप्सराः "। एतां नाभसीं वाणीं श्रुत्वा स भूपतिरभीष्टसिद्धिप्रहृष्टो महिष्या समं स्वनगरीमाययौ। तस्य प्रथमं पद्मरत्यां देव्यां शूरदेवो नाम पुत्रः, तदनु च अनङ्गरतिर्नाम अनङ्गमोहिनी कन्या समजायत। क्रमेण च तस्यां वृद्धिं गतायां स राजा सदृशं वरं प्रेप्सुः पृथिवीमण्डलस्थान् सर्वान् नृपतीन् पटलिखितानानाययत्। यदा तेषु एकोऽपि तस्याः सदृशो न प्रत्यभासत, तदा स राजा वात्सल्यात् तां सुतामभाषत- " वत्से, अहं तावत् ते सदृशं वरं न पश्यामि, तत् सर्वान् नृपान् समानाय्य स्वयंवरं कुरुष्व।" एतत् पितृवचनमाकर्ण्य सा राजपुत्री जगाद- " तात, स्वयंवरम् अतिहेपणं, तदहं नेच्छामि, यो हि युवा सुरूपः केवलं पूर्णं विज्ञानं वेत्ति, तस्मै त्वया अहं देया, न्यूनाधिकेन मे नास्ति प्रयोजनम्।"

व्याख्या

एकदा एकस्मिन् दिवसे, तया पद्मरत्या साकं सह, मन्दाकिनीतटे मन्दाकिनी इत्याख्यायाः नद्याः तीरे, पुत्रकाम्यया पुत्रं लब्धुम्, तपसा तपस्यया, हरं महादेवम्, आराधयामास पूजितवान्, चिरञ्च बहुकालं यावत् तपश्चरन् तपस्यां कृत्वा, कदाचित् परितुष्टशङ्करोदितां परितुष्टेन सन्तुष्टेन शङ्करेण महादेवेन उक्ताम् कथिताम् आकाशवाणीं शुश्राव श्रुतवान्, राजन् नृप उत्पत्स्यते जनिष्यते, ते पुत्रः शूरः वीरः कुलोद्वहः कुलरक्षकः कन्या च एका लावण्येन सौन्द्र्येण जिताप्सराः जिताः सुराङ्गनाः यया सा। एतां नाभसीं वाणीम् आकाशवाणीम्, श्रुत्वा आकर्ण्य, स भूपतिः नृपः, अभिष्टसिद्धिप्रहृष्टः अभीष्टस्य ईप्सितस्य सिद्ध्या प्रहृष्टः प्रफुल्लः, महिष्या राज्ञ्या सह स्वनगरीम् आययौ। तस्य प्रथमं पद्मरत्यां देव्यां शूरदेवः नाम पुत्रः सुतः, तदनु च अनङ्गरतिः नाम अनङ्गमोहिनी कामदेवम् अपि मोहयति या सा तादृशी कन्या पुत्री समजायत उत्पन्ना अभूत्। क्रमेण च तस्यां वृद्धिं गतायां यौवनावस्थायां प्राप्तायाम्, स राजा सदृशं समानम् वरं जामातारम्, प्रेप्सुः प्राप्तुम् इच्छुः, पृथिवीमण्डलस्थान् भूस्थितान्, सर्वान् नृपतीन् महाराजान् पटलिखितान् आमन्त्रणपत्रेण आहूतान् आनाययत्। यदा तेषु एकः अपि तस्याः सदृशः न प्रत्यभासत न दृष्टः, तदा स राजा वात्सल्यात् सन्तानप्रेम्णा, तां सुताम् अभाषत उक्तवान्, वत्से अहं तावत् ते तव सदृशं वरं न पश्यामि तत् तस्मात् सर्वान् नृपान् समानाय्य स्वयंवरं कुरुष्व। एतत् पितृवचनम् आकर्ण्य श्रुत्वा सा राजपुत्री जगाद उक्तवती, तात स्वयंवरम् अतिहेपणम् अयौक्तिकम् तदहं नेच्छामि न वाञ्छामि, यो हि युवा पुरुषः केवलं पूर्णं विज्ञानं वेत्ति तस्मै त्वया अहं देया न्यूनाधिकेन विस्तरेण मे नास्ति प्रयोजनम् इति।

सरलार्थः

स राजा अपुत्रकः आसीत्। तस्माद् स पत्न्याः साकं पुत्रं प्राप्तुं मन्दाकिनीनद्याः तटे शिवस्य आराधनां कृतवान्। तस्य तपस्यया शिवः तुष्टः सन् वररूपेण उक्तवान् यत् तस्य एकः शूरः पुत्रः एका अतिसुन्दरी कन्या च भविष्यति इति। ततः परं तस्यां पद्मरत्यां एकः पुत्रः एका अतिरम्या कन्या च जन्म

अलभत। तस्य पुत्रस्य नाम आसीत् शूरदेवः, कन्यायाः अनङ्गरतिः इति। तस्याः एवं रूपम् आसीत् येन कामदेवः अपि मोहितः स्यात्। क्रमेण सा यौवनावस्थां प्राप्तवती। तां योग्यवराय दानाय सः राजा नृपान् आहूतवान् परन्तु तस्याः सदृशः एकः अपि नासीत्। परं पिता ताम् अनङ्गरतिम् उक्तवान् यत् तया सदृशः वरः न दृश्यते। तस्माद् स्वयंवरं करणीयम् इति। तदा सा उक्तवती यत् स्वयंवरेण बहुधनव्ययः भविष्यति। तस्माद् तत् नापेक्ष्यते। सा परम् उक्तवती यत् - यः रूपसम्पन्नः पुरुषः पूर्णं विज्ञानं जानाति, तं सा परिणेष्यति इति।

व्याकरणविमर्शः

१. परितुष्टशङ्करोदिताम् - परितुष्टश्चासौ शङ्करश्चेति परितुष्टशङ्करः इति कर्मधायसमासः, परितुष्टशङ्करेण उदिताम् परितुष्टशङ्करोदिताम् इति तृतीयातत्पुरुषसमासः।

२. आराधयामास – आपूर्वकात् राध्धातोः लिट्-लकारे प्रथमपुरुषैकवचनम्।

३. उत्पत्स्यते - उत्पूर्वकात् पत्-धातोः कर्मणि लृट्लकारे प्रथमपुरुषैकवचनम्।

४. अभीष्टसिद्धिप्रहृष्टः - अभीष्टस्य सिद्धिः अभीष्टसिद्धिः इति षष्ठीसमासः। अभीष्टसिद्ध्या प्रहृष्टः अभीष्टसिद्धिप्रहृष्टः इति तृतीयातत्पुरुषः।

५. अनङ्गमोहिनी - अनङ्गं कामदेवम् (अपि) मोहयति या सा इति विग्रहः।

६. समजायत – सम्पूर्वकात् जनी प्रादुर्भावे इति धातोः लङ्लकारे प्रथमपुरुषैकवचनम्।

७. जगाद – गद व्यक्तायाम् वाचि इति धातोः लिट्लकारे प्रथमपुरुषैकवचनम्।

८. आययौ - आपूर्वकस्य या प्रापणे इति धातोः लिटि प्रथमपुरुषैकवचने रूपम्।

४.२.३) विभागः - ३

इति दुहितुर्वचः समाकर्ण्य यावत् स भूपतिस्तादृशं वरम् अन्विष्यति, तावत् तत् लोकमुखात् विदित्वा चत्वारो वीरा विज्ञानिनो भव्याः पुरुषा दक्षिणपथात् तं राजानमाययुः। ते च राज्ञा सत्कृताः एकैकशः स्वं स्वं विज्ञानं राजसमक्षं शशंसुः। तेषामेको जगाद- “ अहं तावत् शूद्रः नाम्ना पञ्चफुट्टिकः, एकोऽहमन्वहं पञ्च अग्र्याणि वसनयुग्मानि करोमि, तेषामेकं देवाय प्रयच्छामि, एकं द्विजाय, एकमात्मनः कृते परिगृह्णामि, एकञ्च भार्यायै (या मे भवति) ददामि, पञ्चमञ्च विक्रीय आहारादिकं विदधामि। तदेवं विज्ञानिने मह्यम् अनङ्गरतिस्ते दुहिता दीयताम् ”इति। द्वितीयोऽब्रवीत्- “ अहं तावत् वैश्यः भाषाज्ञो नाम सर्वेषां मृगपक्षिणां रुतं वेद्मि, तदेषा राजपुत्री मह्यं दीयताम् ”इति। ततस्तृतीयोऽभाषत- “ अहं खड्गधरो नाम भुजवीर्यशाली क्षत्रियः, खड्गविद्याविज्ञाने अस्यां क्षितौ मे प्रतिमल्लो नास्ति, हे राजन्, तदेषा तनया ते मह्यं दीयताम् ”इति। ततश्चतुर्थोऽब्रवीत्- “ राजन्, अहं तावत् जीवदत्तो नाम विप्रः, मम चैतादृशं विज्ञानमस्ति यत्, मृतानपि जन्तून् आनीय आशु जीवतो दर्शयामि, तद्वीरचर्य्यासिद्धं माम् एषा ते तनया पतिं प्रपद्यताम् ”इति। एवं ब्रुवतः तान् दिव्यावेशाकृतीन् पश्यन् राजा वीरदेवः सुतया दोलारूढः इवाभवत्। ”

व्याख्या

इति दुहितुः कन्यायाः वचः कथनम् यावत् स भूपतिः नृपः तादृशं वरम् अन्विष्यति, तावत् तत् लोकमुखात् विदित्वा चत्वारः वीराः विज्ञानिनः भव्याः सुरूपाः पुरुषाः दक्षिणपथात् अवन्तिनगरीम् अतिक्रम्य दक्षिणदिग्वर्तिदेशभेदात् तं राजानम् आययुः आगतवन्तः। ते च राज्ञा सत्कृताः सम्मानिताः एकैकशः प्रत्येकम् स्वं स्वं विज्ञानं विद्वत्ताम्, राजसमक्षं नृपस्य समीपम् शशंसुः प्रशंसितवन्तः। तेषाम् एकः जगाद – अहं तावत् शूद्रः नाम्ना पञ्चफुट्टिकः एकः अहम् अन्वहम् प्रत्यहम्, पञ्च अग्र्याणि श्रेष्ठानि वसनयुग्मानि वस्त्राणि करोमि। तेषाम् एकं देवाय देवतायै, प्रयच्छामि ददामि, एकं द्विजाय ब्राह्मणाय, एकम् आत्मनः स्वस्य कृते परिगृह्णामि स्वीकरोमि, एकं च भार्यायै या तस्य पत्नी भविष्यति तस्यै, ददामि पञ्चमं च विक्रीय आहारादिकं विदधामि व्यवस्थापयामि। तदेवं विज्ञानिने मह्यम् अनङ्गरतिः ते तव दुहिता कन्या दीयताम् प्रदीयताम्। द्वितीयः अब्रवीत् उक्तवान् अहं तावत् वैश्यः भाषाज्ञः इति नामकः, सर्वेषां मृगपक्षिणां पशूनाम् रुतं रवम् वेद्मि जानामि, तदेषा राजपुत्री मह्यं मे, दीयताम् समर्प्यताम्। ततः परम् तृतीयः अभाषत अवदत् अहं खड्गधरः नाम भुजवीर्यशाली बलशाली क्षत्रियः खड्गविद्याविज्ञाने अस्यां क्षितौ पृथिव्याम् मे मम प्रतिमल्लः प्रतिस्पर्धी नास्ति, हे राजन् नृप, तदेषा तनया कन्या, ते तव मह्यं दीयताम् अर्प्यताम्। ततः अनन्तरम्, चतुर्थः अब्रवीत् अकथयत् राजन् अहं तावत् जीवदत्तः नाम विप्रः ब्राह्मणः मम च एतादृशं विज्ञानम् अस्ति यत् मृतान् प्राणैः वियुक्तान् अपि जन्तून् पशून् आनीय आशु शीघ्रम् जीवतो दर्शयामि जीवनं दास्यामि, तद्वीरचर्यासिद्धं माम् एषा ते तनया पुत्री पतिं प्रपद्यताम् अङ्गीकुरुताम्। एवं ब्रुवतः कथयतः तान् दिव्यवेशाकृतीन् सुवेशधारिणः, पश्यन् दृष्ट्वा, राजा वीरदेवः सुतया कन्यया, दोलारूढः किंकर्तव्यविमूढः, इव अभवत् जातः इत्यर्थः।

सरलार्थः

तदा तस्याः वचनं श्रुत्वा पिता तादृशवरस्य अन्वेषणे प्रवृत्तः अभवत्। तदा मध्ये एकस्मिन् दिवसे लोकमुखात् वृत्तान्तं श्रुत्वा चत्वारः पुरुषाः राज्ञः सकाशम् आगतवन्तः। तेषां मध्ये एकः आसीत् शूद्रः। तस्य नाम आसीत् पञ्चफुट्टिकः इति। स प्रतिदिनं पञ्च वस्त्राणि वपति स्म। तेषु एकं देवतायै प्रयच्छति, एकं ब्राह्मणाय, एकं स्वयं स्वीकरोति, एकं या तस्य भार्या भविष्यति तस्यै दास्यति, अवशिष्टेन आहारादिकं क्रीणाति। द्वितीयः आसीत् वैश्यः। तस्य नाम आसीत् भाषाज्ञः इति। सः सर्वेषां मृगादिपशूनां पक्षिणां च भाषां जानाति स्म। तृतीयः आसीत् क्षत्रियः। तस्य नाम आसीत् खड्गधरः इति। सः सम्यक्तया खड्गचालनं जानाति स्म। तत्सदृशः खड्गधरः पृथिव्यां दुर्लभः आसीत्। चतुर्थः आसीत् एकः ब्राह्मणः। तस्य नाम आसीत् जीवदत्तः इति। सः एकां विशिष्टां विद्यां जानाति स्म। स मृते जन्तौ पुनः प्राणसञ्चारं कर्तुं शक्नोति स्म।

व्याकरणविमर्शः

१. शशंसुः शंसु स्तुतौ इति धातोः लिट्लकारे प्रथमपुरुषबहुवचने रूपम्।

२. आययुः - आपूर्वकस्य या प्रापणे इति धातोः लिटि प्रथमपुरुषबहुवचने रूपम्।

३. वेद्मि - विद ज्ञाने इति धातोः लटि उत्तमपुरुषैकवचने रूपम्।

४. अब्रवीत् - ब्रूञ् व्यक्तायां वाचि इति धातोः लङि प्रथमपुरुषैकवचने रूपम्।

५. अभाषत – भाष व्यक्तायाम् वाचि इति धातोः लङि प्रथमपुरुषैकवचने रूपम्।

६. प्रतिमल्लः - प्रति प्रतिरूपः मल्लः बलीयान् प्रतिमल्लः तुल्यबलवान् प्रतियोद्धा।

७. वीररचर्य्यासिद्धम् - वीरचर्य्यया वीराचारेण सिद्धम् सफलताम् गतम् प्राप्तैश्वर्यम् इत्यर्थः वीरचर्य्यासिद्धम्।

८. दिव्यावेशाकृतीन् - दिव्याः रमणीयाः वेशाः नेपथ्यानि वसनभूषणानि आकृतयः रूपाणि च येषां तान् दिव्यावेशाकृतीन् सुपरिच्छदान् सुरूपाणि इत्यर्थः इति बहुव्रीहिसमासः।

४.२.४) विभागः - ४

इति कथामाख्याय वेतालः राजानमप्राक्षीत्- "राजन्, ब्रूहि, एतेषां कस्मै कन्यैषा देया, यदि जानन्नपि मे तत्त्वं न वदिष्यसि, तदा ते मूर्द्धा निश्चितं शतधा स्फुटिष्यति, यदि च सदुत्तरं दास्यसि, तदाहं पुनस्तव स्कन्धात् तमेव शिंशपातरुम् आश्रयिष्ये" इति। एतदाकर्ण्य राजा तं वेतालं प्रत्यवादीत्- " योगेश्वर, भवान् केवलं कालक्षेपाय मां मौनं त्याजयति, अन्यथा कोऽयं गहनः प्रश्नः। तदुच्यताम्, शूद्राय कुविन्दाय कथं क्षत्रिया दीयते, वैश्याय च। यच्च तद्गतं मृगादिभाषाविज्ञानं, तत् कस्मिन् कार्ये उपयुज्यते। विप्रेण तेन स्वकर्मप्रच्युतेन ऐन्द्रजालिकेन पतितेन वीरमानिना किम्। तस्मात् क्षत्रियायैव खड्गधराय विद्याशौर्यशालिने सा देया " इति। एतत्तस्य वचो निशम्य स वेतालो योगबलात् स्कन्धदेशात् सहसा अलक्षितः क्वापि जगाम। राजाऽपि तथैव तमनुययौ, सोत्साहघने हि वीरहृदये न जातु खेदोऽन्तरं लभते।।

व्याख्या

इति एवंविधाम्, कथाम् आख्याय श्रावयित्वा, वेतालः राजानम् विक्रमादित्यम्, अप्राक्षीत् पृष्टवान्, राजन्, पूर्वोक्तं शापं स्मृत्वा ब्रूहि कथय, एतेषां कस्मै कन्या एषा देया प्रदेया इति। एतद् आकर्ण्य श्रुत्वा राजा तं वेतालं प्रत्यवादीत् प्रत्युत्तरं कृतवान्, भवान् केवलं कालक्षेपाय मां मौनं त्याजयति त्यागं कारयति, अन्यथा कः अयं गहनः गभीरः प्रश्नः। तदुच्यताम् कथ्यताम्, शूद्राय कुविन्दाय तनुतवायाय कथं क्षत्रिया दीयते, वैश्याय च। यच्च तद्गतं मृगादिभाषाविज्ञानं तत् कस्मिन् कार्ये उपयुज्यते न कुत्रापि तस्य प्रयोजनम् अस्ति इत्यर्थः। विप्रेण अपि तेन स्वकर्मप्रच्युतेन निजकार्यविच्युतेन, ऐन्द्रजालिकेन पतितेन वीरमानिना किम्। तस्मात् क्षत्रियाय एव खड्गधराय विद्याशौर्यशालिने सा देया प्रदेया इति। एतत् तस्य वचः वाक्यम्, निशम्य श्रुत्वा, सः वेतालः योगबलात् स्कन्धदेशात् सहसा हठात्, अलक्षितः अदृष्टः, क्वापि जगाम गतवान्। राजा अपि तथैव तम् अनुययौ अनुसृतवान्, सोत्साहघने उत्साहभरिते, हि वीरहृदये शूराणां मनसि, न जातु खेदः कष्टम्, अन्तरम् अवसानं, लभते प्राप्नोति इत्यर्थः।

सरलार्थः

एवं कथां श्रावयित्वा सः वेतालः विक्रमादित्यं पृष्टवान् यत् एतेषु कः ताम् अनङ्गरतिं प्राप्स्यति इति। तदा तस्य प्रश्नं श्रुत्वा सः विक्रमादित्यः उत्तरं दत्तवान् यत् - अयम् सरलः प्रश्नः इति। तथाहि

कन्या क्षत्रिया। तस्मात् सा उच्चकुलोद्भवा। सा शूद्राय न दातुं शक्यते। किञ्च वैश्यः मृगादिभाषां जानाति स्म। पत्न्याः परिग्रहे तस्य ज्ञानस्य कापि आवश्यकता नास्ति। किञ्च विप्रस्य जपध्यानपूजादिकं कार्यम्। सः स्वकर्म परित्यज्य अन्यस्मिन् कर्मणि नियुक्तः। तस्मात् सः अपि तां प्राप्तुं न शक्नोति। तस्मात् यः क्षत्रियः खड्गधरः आसीत्। सः एव तस्याः रक्षणे समर्थः. तस्मात् तस्मै एव कन्या देया। एतेन तस्याः समग्रं जीवनं सुखमयं स्यात्। एवं समीचीनम् उत्तरं प्राप्य स वेतालः पुनः शिंशपावृक्षं प्रति गतवान्। राजा अपि पुनः तम् आनेतुं गतवान्। यतो हि उत्साहपूर्णं वीराणां हृदयम् अवसादं क्लेशं वा कदापि न अनुभवति।

व्याकरणविमर्शः

१. अप्राक्षीत् - प्रच्छ ज्ञीप्सायाम् इति धातोः लुङ्लकारे प्रथमपुरुषैकवचने रूपम्।

२. सोत्साहघने - उत्साहेन अध्यवसायेन घनः दाढर्यम् उत्साहघनः, उत्साहश्च घनश्च उत्साहघनौ ताभ्यां सह वर्तमाने सोत्साहघने उद्यमदृढतासंयुक्ते इत्यर्थः अथवा उत्साहेन घनः दृढः दृढोत्साहः इत्यर्थः। तेन सह वर्तमाने अथवा उत्साहेन घनः सान्द्रः निरन्तरः इत्यर्थः, पूर्णम् इति यावत्। पूर्णोत्साहः इत्यर्थः तेन सह विद्यमाने इति बहुव्रीहिसमासः।

३. निशम्य – निपूर्वकात् शम्-धातोः ल्यपि निशम्य इति रूपम्। तस्य च श्रुत्वा इत्यर्थः।

४. जगाम – गमॢ गतौ इति धातोः लिट्लकारे प्रथमपुरुषैकवचने रूपम्।

४.२.५) प्रथमकथायाः तात्पर्यार्थः

अत्र कथायां वेतालः वीरविक्रमादित्याय एकां कथां श्रावितवान्। अत्र कस्याश्चित् कन्यायाः कन्यादानप्रसङ्गः वर्णितः। तत्र तां कन्यां प्राप्तुं चत्वारः वर्णीयाः आगतवन्तः। तेषु एकः शूद्रः, एकः वैश्यः, एकः क्षत्रियः अपरश्च ब्राह्मणः आसीत्। ते स्वस्वकार्याणि राज्ञे उक्तवन्तः। ततः परं राजा विचलितः अभवत् यतो हि सः निश्चयं कर्तुं न शक्तवान् यत् कस्मै कन्या देया इति। तदा वेतालः अमुं प्रश्नं विक्रमादित्यं प्रति उक्तवान्। सः उक्तवान् यत् क्षत्रियात् अन्ये सर्वे अनुपयुक्तकार्यरताः स्वस्वकर्मप्रच्युताः आसन्। तेषु कः योग्यः स्यात् इत्यस्मिन् प्रश्ने वेतालेन राज्ञे पृष्टे सति सः राजा स्वधर्मं पालयित्रे क्षत्रियाय सा कन्या प्रदेया इति सम्यक् उत्तरितवान्। तदा वेतालः पुनः शिंशपावृक्षं गतवान् राजा अपि तम् आनेतुम् तत्र गतः। इत्येवम् कथा समाप्ता।

पाठगतप्रश्नाः-१

१. श्मशानं कीदृशम् आसीत्।

२. उज्जयिन्याः राजा कः।

३. उज्जयिन्याः सत्ययुगे किं नाम।

४. त्रेतायुगे उज्जयिन्याः नाम किम्।

५. हिरण्यवतीति कस्मिन् युगे प्रख्याता आसीत्।

६. कलौ पद्मावत्याः नाम किम्।

७. वीरदेवस्य पत्न्याः नाम किम्।

८. राजा पुत्रप्राप्त्यर्थं कस्य आराधनां कृतवान्।

९. राज्ञः पुत्रस्य नाम किम्।

१०. शिववरप्रदत्तायाः कन्यायाः नाम किम्।

११. कीदृशं वरं सा याचितवती।

१२. शूद्रस्य नाम किम्।

१३. शूद्रः प्रतिदिनं कति वस्त्राणि वपति स्म।

१४. वैश्यस्य नाम किम्।

१५. वैश्यः किं जानाति स्म।

१६. क्षत्रियस्य नाम किम्।

१७. ब्राह्मणस्य नाम किम्।

१८. जीवदत्तस्य किं वैशिष्ट्यम् आसीत्।

१९. विक्रमादित्यस्य मतानुसारेण कस्मै कन्या देया।

२०. कीदृशं हृदयं क्लेशं न लभते।

२१. स राजा .... गत्वा तं .... स्कन्धेनादाय प्रस्थितः।

२२. कथमस्मिन् .... निशि ते एकादृक् प्रयासः।

२३. कलौ .... इति पुरी अस्ति।

२४. उज्जयिन्याम् आसीत् .... नाम नृपतिः।

२५. राजा .... तटे पुत्रकाम्यया तपसा हरमाराधयामास।

२६. प्रथमं पद्मरत्यां .... नाम पुत्रः जातः।

२७. वीरदेवः कन्यायाः .... कृते वरान् अन्विषति स्म।

२८. स्वयंवरम् ...., तदहं नेच्छामि।

२९. परितुष्टशङ्करोदिताम् इत्यस्य विग्रहं लिखत।

३०. अहं तावत् शुद्रः नाम्ना ....।

३१. अहं वैश्यः .... नाम सर्वेषां मृगपक्षिणां रुतं वेद्मि।

३२. अहं भुजवीर्यशाली क्षत्रियः .... नाम।

३३. अहं .... नाम विप्रः।

३४.यदि जानन्नपि मे तत्त्वं न वदिष्यति, तदा ते मूर्द्धा निश्चितं .... स्फुटिष्यति।

३५.योगेश्वर, भवान् केवलं .... मां मौनं त्याजयति।

३६. सोत्साहघने हि .... न जातु खेदः अन्तरं लभते।

३७.स्तम्भं मेलयत।

स्तम्भः १	स्तम्भः २
१. श्मशानम्।	वीरहृदयम्
२. उज्जयिनी सत्ययुगे	खड्गधरः
३. वीरदेवस्य पत्नी	द्वापरयुगे
४. हिरण्यवती	भूतसङ्कुलम्
५. क्षत्रियः	पद्मावती
६. सोत्साहघनम्	पद्मरतिः

४.३) कः त्यागी

४.३.१) पूर्वपीठिका

यतो धर्मस्ततो जयः। अर्थात् यत्र धर्मः अस्ति तत्र जयः निश्चितः एव। अत्र कथायां सा मदनसेना स्वस्याः वचन-सत्यतायाः पालनाय स्वपत्युः सकाशात् क्षमाम् अनुमतिं च याचितवती। अपि च चौरं दुर्जनं ज्ञात्वापि वचनपालनाय पुनः तस्य निकटं गतवती। तस्मात् अस्याः कथायाः अध्ययनेन सत्यतायाः पालनं सर्वदा सर्वथा च करणीयमिति विवेकः लभ्यते। अपि च वचनैः बद्धा सती अपि सा मदनसेना स्वपितुः मनसः अभिलाषः अन्यथा यथा न स्यात् तदर्थं स्वस्याः भाविदुःखमपि अङ्गीकृतवती। तस्माद् एतेन तस्याः पितरं प्रति स्वकुलं प्रत्यपि श्रद्धा आत्मत्यागश्च परिलक्ष्यते। किञ्च चौरस्य त्यागोऽपि अत्र मुख्यः।

४.३.२) विभागः १

ततश्च स राजा पुनः शिंशपामूलं गत्वा तं वेतालं तथैव स्कन्धमारोप्य सत्वरं कृतमौनः समुच्चचाल। प्रयान्तञ्च तं स्कन्धवर्ती स वेतालोऽपृच्छत्- राजन्, श्रान्तोऽसि, तदिमां श्रान्तिहारिणीं कथां शृणु-

आसीद् वीरबाहुर्नाम सकलभूपालशिरःसमभ्यर्चितशासनः पाकशासन इवापरो नृपतिः, तस्यानङ्गपुरं नाम नगरवरमभवत्। तत्रार्थदत्तो नाम महाधनः सार्थवाहः प्रतिवसति स्म। तस्य धनदत्तो नाम ज्येष्ठः पुत्रः कनीयसी च कन्या मदनसेना नाम समजायत। एकदा धर्मदत्तो नाम कस्यचिद् वणिक्पतेस्तनयः तां लावण्यरसनिर्झरां कुचकुम्भाग्रबलित्रितयरञ्जितां यौवनद्विरहस्येव

लीलामज्जनवापिकां वीक्ष्य सद्यः स्मरबाणौघपातापहृतचेतनः समपद्यत- अहो, मारेण धारधिरूढेन अमुना रूपेण द्योतिता मल्ली मे हृदयं भेत्तुमिव निर्मिता। इत्येवं प्रासादाग्रमारूढां तां दृष्ट्वा चिन्तयतः चक्राह्वस्येव तस्य वासरोऽतिचक्राम। ततः सा मदनसेना चित्तञ्च तस्य धर्मदत्तस्य तद्दर्शनदुःखाग्निसन्तप्तं गृहान्तरं विवेश। भास्वांश्च तद्दर्शनजनितरागोऽपराम्बुधौ निपपात। ताञ्च सुमुखीं नक्तम् अभ्यन्तरागतां दृष्ट्वा तन्मुखाब्जविनिर्जितश्चन्द्रः शनैरुदगात्। धर्मदत्तश्च तावद् गृहं गत्वा तामनुचिन्तयन् शयने चन्द्रपादाहतो लुठन् निपत्य तस्थौ, यत्नेन सखिभिर्बन्धुभिश्च पृच्छयमानो न किञ्चित् कथयामास। निशि च कृच्छ्रात् प्राप्तनिद्रः तथैव तां पश्यन् अनुनयंश्च समुत्सुकः किमिव नाकरोत्। प्रातश्च प्रबुद्धो गत्वा रहसि स सखीं प्रतीक्षमाणाम् उद्यानवर्तिनीं मदनसेनां ददर्श, उपेत्य च परिष्वङ्गलालसः प्रेमपेशलैर्वचोभिश्चरणानलः उपच्छन्दयामास।

व्याख्या

ततः च राजा पुनः शिंशपामूलं गत्वा तं वेतालं तथैव स्कन्धम् आरोप्य स्थापयित्वा, सत्वरं शीघ्रम्, कृतमौनः तूष्णीम्, समुच्चचाल। प्रयान्तं च तं स्कन्धवर्ती स वेतालः अपृच्छत् राजन् श्रान्तः क्लान्तः असि, तद् तस्मात् इमां श्रान्तिहारिणीं क्लेशापकारिणीम् कथां शृणु कथय।

आसीद् वीरबाहुः नाम सकलभूपालशिरःसमभ्यर्चितशासनः समस्तराज्ञाम् मूर्ध्ना पूजितः शासनः, पाकशासनः असुरविशषस्य हन्ता इन्द्रः इव अपरः द्वितीयः अपरः पाकशासनः इव इत्यन्वयः। नृपतिः नरपतिः। तस्य अनङ्गपुरं नाम नगरवरम् नगरश्रेष्ठम् श्रेष्ठनगरम् इत्यर्थः, अभवत् आसीत् इत्यर्थः। तत्र अर्थदत्तः नाम महाधनः धनिकः, सार्थवाहः वणिक्, प्रतिवसति स्म निवसति स्म। तस्य धनदत्तः नाम ज्येष्ठः पुत्रः, कनीयसी च कन्या मदनसेना नाम समजायत आसीत्। एकदा एकस्मिन् दिवसे धर्मदत्तः नाम कस्यचिद् वणिक्पतेः वणिक्श्रेष्ठस्य वणिजः तनयः पुत्रः, तां लावण्यरसनिर्झरां रूपसौन्दर्यपरिपूर्णाम्, कुचकुम्भाग्रबलित्रितयरञ्जितां पूर्णकुम्भसदृशस्तनाभ्यां भूषितां त्रिबलिशोभिताम्, यौवनद्विरहस्येव यौवनावस्थासम्पन्नः गजः इव, लीलामज्जनवापिकाम् विहारयोग्यसरोवररूपाम्, वीक्ष्य दृष्ट्वा, सद्यः तत्क्षणम् वीक्षणक्षणमेव इत्यर्थः, स्मरबाणौघपातापहृतचेतनः कामशराघातविनष्टसंज्ञः, समपद्यत समजायत। अहो खेदे विस्मये वा, मारेण स्मरेण कामेन इत्यर्थः, धारधिरूढेन सेनापतिरूपिणा अमुना रूपेण सौन्दर्येण द्योतिता प्रकाशिता मल्ली मल्लिकापुष्पम्, मल्लिकापुष्पवत् सुकोमला मनोहारिणी च इत्यर्थः। मे मम हृदयं चेतः, भेत्तुम् बेद्धुम् इव निर्मिता रचिता। कामदेवः सैनापत्यं गतः मल्लिकापुष्पमेव ईदृशसौन्दर्येण परिवर्तितं कृत्वा मम हृदयं बेद्धुम् निर्मितवान् इति समुदायार्थः, कुसुमसुकुमारापि इयम् निशितशरवत् मम हृदयम् पीडयति, इत्यहो इति भावः यद्वा धारा खड्गादेः निशितमुखम् ताम् अधिरूढेन तथात्वं गतेन धारात्वं प्राप्तेन इत्यर्थः, धाराधिरूढेन तीक्ष्णाग्रखड्गादिरूपिणा, हृदयभेदकसाधर्म्यात् इति भावः इति द्वितीयातत्पुरुषसमासः। इत्येवं प्रासादाग्रम् आवासस्य सम्मुखस्थानम्, आरूढाम् आगताम्, तां दृष्ट्वा चिन्तयतः चक्राह्वस्येव चक्रवाकाख्यपक्षिविशेषः इव निशि प्रियाविरहविधुरस्येति भावः, चक्रवाकदम्पती रात्रौ परस्परम् एकत्र स्थातुम् न शक्नुतः, नद्याः जलाशयस्य वा एकस्मिन् तीरे चक्रवाकः अपरस्मिन् चक्रवाको रात्रौ अवस्थाय प्रभाते पुनः संयुज्येते इति प्रसिद्धिः। दुःखेन तस्य वासरः दिवसः,

अतिचक्राम अतीयाय, व्यपगतवान् इत्यर्थः रजनी समागतवती इति भावः विरहसम्पादनात् रजनीसमागमो यथा चक्रवाकस्य दुःखकरः, वासराभ्युदयश्च मिलनसम्पादनात् तथा सुखकरः किन्तु सुखवासरो मुहूर्त्तमिव अतिगच्छति, दर्शनपिपासा च न पूर्णतृप्तिं लभते, एवं धर्मदत्तस्यापि मदनसेनादर्शनसुयोगसम्पादकः सुखवासरः मुहूर्तमिव अपजगाम, अदर्शनसम्पादिका सुदीर्घा दुःखरजनी च समायाता इति तात्पर्यम्।

ततः सा मदनसेना चित्तं मनः, मदनसेनया अपहृतम् इति भावः, धर्मदत्तस्य इत्यनेन सम्बन्धः। च तस्य धर्मदत्तस्य तद्दर्शनदुःखाग्निसन्तप्तं तदप्राप्तिनिमित्तकक्लेशानलदग्धम् इत्यर्थः, गृहान्तरं विवेश इति मदनसेनाया गृहमध्यप्रवेशात् तया अपहृतस्य धर्मदत्तचित्तस्यापि गृहमध्यप्रवेशो बोद्धव्यः इति भावः। भास्वान् सूर्यः च, तद्दर्शनजनितरागः तस्याः मदनसेनायाः दर्शनात् जनितः उत्पन्नः रागः अनुरागः रक्तवर्णता च यस्य तादृशः तद्दर्शनजनितरागः ताम् दृष्ट्वा समुत्पन्नरागः, अस्तगमनकालिकरक्तवर्णश्च, तादृशः सन् इत्यर्थः, अपराम्बुधौ पश्चिमसमुद्रे, निपपात तदप्राप्तिजनितदुःखात् इति भावः, अस्तं गतः अस्तमितः सूर्यः समुद्रगर्भे निमज्जतीति प्रतीतिर्जायते दूरात्। तां च सुमुखीं नक्तं रात्रौ अभ्यन्तरागतां गृहान्तरं गच्छन्तीं, दृष्ट्वा तन्मुखाब्जविनिर्जितः तद्वदनकमलपराभूतः चन्द्रः शनैः मन्दम् मन्दम् उदगात् उदगमत्। तस्याः मुखशोभया निर्जितचन्द्रः तदग्रे स्थातुम् लज्जितः सन् एतावन्तम् कालम् अन्तराले अतिष्ठत्, इदानीम् ताम् स्थानान्तरगताम् दृष्ट्वा पुनः शनैः तत्र आगतवान् इति तात्पर्यम्। धर्मदत्तश्च तावत् गृहं गत्वा ताम् अनुचिन्तयन् शयने शय्यायाम् चन्द्रपादाहतः चन्द्रस्य पादेन किरणेन आहतः पीडितः चन्द्रपादादाहतः चन्द्रांशुसन्तप्तः, चन्द्रकिरणस्य विरहोद्दीपकत्वात् इति भावः, लुठन् गात्राणि विक्षिपन् तस्थौ आसीत्। यत्नेन सखिभिः सुहृद्भिः बन्धुभिः स्वजनैः च यद्वा सखिभिः सहायैः सहचरैः इति यावत्, बन्धुभिः मित्रैः पृच्छ्यमानः जिज्ञास्यमानः न किञ्चित् न किमपि, कथयामास कथितवान्। निशि रात्रौ, च कृच्छ्रात् कष्टेन, प्राप्तनिद्रः तथैव पूर्ववदेव, मदनसेना प्रासादाग्रम् तत्पुरतः तिष्ठति इत्येवंरूपेण इत्यर्थः। तां पश्यन् स्वप्ने इति भावः। अनुनयन् अनुरोधं कुर्वन्, समुत्सुकः समुत्कण्ठितः तदप्राप्तिनिमित्तक इति भावः, किमिव नाकरोत्, प्रातश्च प्रबुद्धः जागरितः, गत्वा रहसि निर्जने स सखीं प्रतीक्षमाणाम् अपेक्ष्यमानाम्, उद्यानवर्तिनीं मदनसेनां ददर्श अपश्यत्, उपेत्य तत्समीपं गत्वा, च परिष्वङ्गलालसः परिषङ्गाय संश्लेषाय, आलिङ्गनाय इत्यर्थः, लालसा अतीव तृष्णा, औत्सुक्यं वा यस्य तादृशः परिष्वङ्गलालसः आलिङ्गनकामः सन् इत्यर्थः आलिङ्गभिलाषी इति यावत्, प्रेमपेशलैः प्रेम्णा अनुरागेण पेशलैः चारुभिः मनोहरैः इत्यर्थः, प्रेमपेशलैः अनुरागमधुरैः इति यावत्। वचोभिः वाक्यैः, चरणानलः पादौ पतितः, उपच्छन्दयामास प्रार्थयामास प्रार्थितवान् स्वम् पतिरूपेण ग्रहणार्थम् अनुरुरोध इत्यर्थः।

सरलार्थः

राजा विक्रमादित्यः पूर्ववद् शिंशपामूलं गत्वा वेतालं च नीत्वा आगच्छन् आसीत्। स वेतालः राज्ञः श्रमस्य नाशाय कथां कथितुम् आरब्धवान्। प्राचीनकाले वीरबाहुः इति नाम्ना प्रसिद्धः कश्चन नृपतिः आसीत्। सः सुरलोकस्य इन्द्रः इव समस्तभूपतीनां पूजनीयः आसीत्। सः अनङ्गपुरम् इत्याख्ये नगरे वसति स्म। तस्मिन् नगरे अर्थदत्तनामकः महान् धनिकः वणिक् वसति स्म। तस्य पुत्रस्य नाम

आसीत् धनदत्तः, कन्यायाः नाम आसीत् मदनसेना। धनदत्तस्य सखा धर्मदत्तः एकस्मिन् दिवसे तां मदनसेनां दृष्टवान्। एकवारं दृष्ट्वा एव स तस्याः प्रेम्नि पतितः। तां प्राप्तुं तस्य मनसि आकाङ्क्षा प्रबला अभवत्। रात्रौ तस्याः विरहवेदनया निद्रां कर्तुमपि स न शक्तवान्। चन्द्रस्य प्रभा अपि तस्य समीपे वेदनीया इति प्रतिभाति स्म। परस्मिन् दिवसे प्रातः उद्याने तां दृष्ट्वा तस्याः सकाशं गत्वा स्वस्य अभिलाषम् उक्तवान्।

व्याकरणविमर्शः

- सकलभूपालशिरःसमभ्यर्चितशासनः - सकलानाम् सर्वेषाम् भूपालानाम् राज्ञाम् शिरोभिः मस्तकैः यद्वा सकलैः भूपालैः शिरसा नतमस्तकेन समभ्यर्चितम् सम्पूजितम् समादारेण गृहीतम् इति यावत्, शासनम् आज्ञा यस्य सः सकलभूपालशिरःसमभ्यर्चितशासनः सर्वराजपूजितादेशः इति बहुव्रीहिसमासः।
- पाकशासनः - पाकः असुरविशेषः, तस्य शासनः निहन्ता पाकशासनः इन्द्रः।
- सार्थवाहः - सार्थम् समूहम् धनसमूहम् द्रव्यसमूहम् वा इत्यर्थः, वहति यः सः सार्थवाहः, वणिक् इति यावत्।
- लावण्यनिर्झराम् - लावण्यम् मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा। प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते॥ इत्युक्तलक्षणकान्तिविशेषः, तदेव रसः जलम् (रसो गन्धरसे जले इति मेदिनी।) तस्य निर्झरः वारिप्रवाहः, स इव इत्यर्थः, ताम् लावण्यरसनिर्झराम् लावण्यवारिझराम्, अतीव लावण्यवतीम् इत्यर्थः इति षष्ठीतत्पुरुषसमासः।
- कुचकुम्भाग्रबलित्रितयरञ्जिताम् - कुचौ स्तनौ कुम्भौ घटौ हस्तिशिरःस्थमांसपिण्डौ इव वा, तयोः अग्रम् कुचकुम्भाग्रम् चुचुकम् बलिः जठरावयवविशेषः, तस्याः त्रितयम् त्रिसंख्यकम् बलित्रितयम् उदररेखात्रयम्, कुचकुम्भाग्रम् च बलित्रितयम् च कुचकुम्भाग्रबलित्रितये ताभ्याम् रञ्जिताम् शोभिताम् कुचकुम्भाग्रबलित्रितयरञ्जिताम् चुचुकत्रिबलिशोभिताम् इति तृतीयातत्पुरुषसमासः।
- यौवनद्विरहस्येव – यौवनम् तारुण्यम् एव, द्विरदः हस्ती दुर्वारवेगत्वात् इति भावः। तस्य यौवनद्विरदस्य तारुण्यगजस्य इति यावत्।
- लीलामज्जनवापिकाम् विहारयोग्यसरोवररूपाम् - लीलार्थम् क्रीडार्थम् जलक्रीडार्थम् च, मज्जनवापिका स्नानसरः, ताम् तादृशीम् लीलामज्जनवापिकाम् क्रीडासरसीम् इव इत्यनेन अन्वयः, द्विरदः यथा सरसि अवगाह्य क्रीडति तथा यौवनमपि लावण्यरसनिर्झरे निमज्ज्य चिक्रीडिषति इति चतुर्थीतत्पुरुषसमासः।
- स्मरबाणौघपातापहृतचेतनः स्मरस्य कामस्य बाणौघानाम् शरसमूहानाम् पञ्चानामेव बाणानाम् इत्यर्थः, पातेन पतनेन आघातेन इत्यर्थः, अपहृता चोरिता, विनष्टा इत्यर्थः, चेतना संवित् यस्य तादृशः स्मरबाणौघपातापहृतचेतनः कामशराघातविनष्टसंज्ञः इति बहुव्रीहिसमासः।
- धारधिरूढेन धारा सैन्धाग्रिमस्कन्धः, सैन्धपुरोभागः इत्यर्थः। तत्र अधिरूढेन अधिष्ठितेन धाराधिरूढेन सैन्धाग्रस्थितेन, सेनापतिरूपिणा इत्यर्थः।

टिप्पणी

- अतिचक्राम – अतिपूर्वकात् क्रमधातोः लिटि तिपि णलि रूपम्।
- तद्दर्शनदुःखाग्निसन्तप्तम् - तस्याः मदनसेनायाः दर्शनेन अवलोकनेन यत् दुःखम् कामबाणाहुतिजनिकष्टम्, तदेव अग्निः अनलः तेन सन्तप्तम् प्रज्वलितम् तद्दर्शनदुःखाग्निसन्तप्तम् तदप्राप्तिनिमित्तक्लेशानलदग्धम् इत्यर्थः।
- तन्मुखाब्जविनिर्जितः - तस्याः मदनसेनायाः मुखाब्जात् मुखपद्मात् विनिर्जितः पराभूतः अत एव पलायितः इति भावः, तन्मुखाब्जविनिर्जितः तद्वदनकमलपराभूतः।

४.३.३) विभागः -२

साब्रवीत्- अहं कन्या, साम्प्रतं ते परदाराश्च, यतोऽहं पित्रा समुद्रदत्ताय वणिजे वाचा दत्ता। कतिपयैरेव दिनैर्विवाहो मे भविता। तत् तूष्णीं गच्छ, मा कश्चित् पश्येत्, ततो दोषो भवेत्। इत्युक्तस्तया त्यक्तश्च स धर्मदत्तस्तां जगाद- सुन्दरि, यदस्तु, त्वां विना नाहं जीवेयम्। तदाकर्ण्य सा वणिक्सुता कन्याभावदूषणभयाकुला तमुवाच- तर्हि विवाहो मे तावत् सम्पद्यतां, पिता मे चिरकाङ्क्षितं कन्यादानफलं लभताम्। ततोऽहं त्वां निश्चितं प्रणयेन समुपेष्यामि। तदाकर्ण्य सोऽब्रवीत्- अन्यपूर्वा प्रिया मम नेष्टा। परभुक्ते कमले विमलेऽपि किं रतिर्जायते। इति तेनाभिहिता सावादीत्- तर्हि कृतोद्वाहैव पूर्वं त्वामुपयास्यामि, ततः पतिम् इति। एवमुक्तवतीं तां वणिक्पुत्रीम् प्रत्ययार्थं शपथेन सत्येन स धर्मदत्तः सम्बन्धः। ततस्तेनोज्झिता सा समुद्विग्ना स्वं मन्दिरं विवेश।

व्याख्या

सा मदनसेना, अब्रवीत् अवदत्, अहं कन्या कुमारी, अनूढा अविवाहिता इति यावत्, साम्प्रतम् अधुना ते परदाराः परपत्नी च, यतः यस्मात्, अहं पित्रा जनकेन, समुद्रदत्ताय वणिजे व्यापारिणे, वाचा वाक्येन, दत्ता समर्पिता, अहम् वाग्दत्ता अभवम् इत्यर्थः, कन्याम् इमाम् तुभ्यम् अहम् विवाहविधिना दास्यामि, इत्येवंरूपेण पित्रादिभिः दातुम् सङ्कल्पिता कन्या वाग्दत्ता, तस्याः अन्येन सह विवाहः गर्हितः इति शास्त्रकृताम् मतम्, कतिपयैः एव दिनैः विवाहः परिणयः, मे भविता भविष्यति, तत् तस्मात्, तूष्णीं किमपि अनुक्त्वा, गच्छ याहि, मा कश्चित् पश्येत्, ततः दोषः भवेत्। इत्युक्तः तया त्यक्तः प्रत्याख्यातः च स धर्मदत्तः तां जगाद अकथयत् सुन्दरि सौम्ये, यदस्तु, त्वां विना नाहं जीवेयम् जीवितुं शक्नुयाम्। तद् आकर्ण्य श्रुत्वा सा वणिक्सुता कन्याभावदूषणभयाकुला विवाहपूर्वावस्थायाः नाशरूपभयेन व्याकुला, तम् उवाच अवदत् तर्हि यद्येवं तदा इत्यर्थः, विवाहः मे तावत् सम्पद्यतां सिध्यतु निष्पन्नो भवतु इत्यर्थः, पिता मे चिरकाङ्क्षितं सदाप्रार्थितम्, कन्यादानफलं कन्यादानेन दुहितृदानेन यत् फलम् पुण्यरूपम् इत्यर्थः, लभताम्, ततः अहं त्वां निश्चितम् अवश्यम्, प्रणयेन प्रेमभावेन, समुपेष्यामि सङ्गमिष्ये, त्वत्प्रणयिनीरूपेण तव समीपं गमिष्यामि इत्यर्थः। तद् आकर्ण्य श्रुत्वा सः अब्रवीत् उक्तवान् अन्यपूर्वा केनापि पूर्वं स्वीकृता, मम प्रिया नेष्टा न काङ्क्षिता, परभुक्ते अन्योपभुक्ते अपरेण सेविते, कमले पद्मे विमले शुभ्रे अपि किं रतिः प्रीतिः, अनुरागः इति यावत्। जायते भवति। इति तेन अभिहिता कथिता, सा अवादीत् उक्तवान् तर्हि कृतोद्वाहैव विवाहं कृत्वा एव, पूर्वं विवाहानन्तरम् स्वामिसम्भाषणात् प्रागेव त्वाम् उपयास्यामि तव समीपं गमिष्यामि, ततः पतिम् इति। एवम् उक्तवतीं कथयन्तीम्, तां वणिक्पुत्रीं प्रत्ययार्थं विश्वासार्थम्, शपथेन

सत्येन च स धर्मदत्तः सम्बद्धः। ततः तेन उज्झिता मुक्ता, सा समुद्विग्ना व्याकुलचित्ता, स्वं मन्दिरं स्वस्याः गृहम्, विवेश प्रविष्टवती इत्यर्थः।

सरलार्थः

तदा सा उक्तवती यत् सा कन्या, तस्याः विवाहः न अभवत्। किञ्च समुद्रदत्तेन सह तस्याः विवाहः अपि निश्चितः। तस्मात् तत् न सम्भवति इति। तदा स उक्तवान् यत् तां न प्राप्नोति चेत् स न जीविष्यति इति। तदा स्वस्याः चरित्रदूषणं स्याद् इति चिन्तया व्याकुला सा उक्तवती यत् विवाहानन्तरं तस्य सकाशं गमिष्यति इति। तदा स उक्तवान् यत् केनापि पूर्वं स्वीकृतां प्रियां स न स्वीकरिष्यति इति। ततः परं सा वचनं दत्तवती यत् - विवाहात् परम् आदौ धर्मदत्तस्य समीपम् आगमिष्यति, परं समुद्रदत्तस्य समीपम् गमिष्यति इति।

व्याकरणविमर्शः

- कन्याभावदूषणभयाकुला - कन्याभावस्य कुमारीत्वस्य, पुंसंसर्गाभावरूपस्य इत्यर्थः, दूषणम् दुष्टिः, बलपूर्वकालिङ्गनादिना धर्मदत्तेन तद्विशुद्धितायाः अपनोदनम् इत्यर्थः, तस्मात् भयाकुला त्रस्ता कन्याभावदूषणभयाकुला सतीत्वनाशभयव्यस्ता।
- अन्यपूर्वा - अन्यः अपरः पुरुषः पूर्वः प्रथमः प्रणयीति भावः, यस्याः सा अन्यपूर्वा पूर्वप्रणयिनं विहाय पश्चात्कृततद्भिन्नप्रणयपात्रा, पुनर्भूरिति यावत् इति बहुव्रीहिसमासः। यद्वा अन्येन पुरुषान्तरेण पूर्वम् प्रथमम् उपभुक्तम् इति भावः या सा अन्यपूर्वा पुरुषान्तरोपभुक्ता इति बहुव्रीहिसमासः।
- कृतोद्वाहः - कृतः सम्पादितः उद्वाहः परिणयः यस्याः सा कृतोद्वाहा सम्पन्नविवाहव्यापारा।

४.३.४) विभागः ३

अथ प्राप्ते लग्नदिवसे निर्वृत्तोद्वाहमङ्गला सा गत्वा पतिगृहं नीत्वा च उत्सवेन वासरं, निशि पत्या समं शयनीय-गृहमध्यास्त, तत्र शय्यानिषण्णापि असम्मुखी समुद्रदत्तस्य तस्याः पत्युः परिष्वङ्गं न प्रत्यपद्यत। तेनानुनीयमानापि सा यदा उदश्रुः बभूव, नाहमस्या अभिमतोऽस्तीति हृदाकरोत्, अवादीच्च- सुन्दरि, यदि तेऽहं नाभिमतः, तत्ते योऽभिमतः,तं सेवितुं गच्छ। तदाकर्ण्य सा नतमुखी शनैरवादीत्- नाथ, त्वं मे प्राणाधिकः प्रेयान्, किन्तु मे विज्ञप्तिमेकां शृणु, सहर्षं मे अभयं प्रयच्छ, शपथञ्च कुरुष्व, आर्यपुत्र, अवक्तव्यमपि ते वदामि। एवमुक्तवती सा तथेति कृच्छ्रात् प्रतिपाद्यमानं तं सविषादं सलज्जं सभयञ्चावादीत्- नाथ, एकदा एकाकिनीं गृहोद्याने मां दृष्ट्वा धर्मदत्तो नाम मम भ्रातुः सखा युवा स्मरातुरः मामरुणत्। अहं परीवादं पितुः कन्यादानफलञ्च रक्षन्ती हठप्रवृत्तस्य तस्य वाचमयच्छं यत्- पूर्वं विवाहिता त्वामुपेष्यामि, ततः पतिम् इति। तत् प्रभो, मे सत्यं प्रतिपालय, अनुमन्यस्व मां तदन्तिकगमनाय, तन्निकटं गत्वा क्षणेन आगमिष्यामि, न हि आबाल्यसेवितं सत्यमतिक्रमितुं शक्नोमि। इति तस्याः वचोवज्रपातेन सहसा हतः समुद्रदत्तः सत्येन बद्धः क्षणमचिन्तयत्- अहो धिक्, इयमन्यरक्ता, एतया ध्रुवमेव गन्तव्यं, तत् कथं

सत्यं हन्मि। यातु इयं, कोऽस्याः परिग्रहः। इत्यालोच्य तां यथेष्टगमनाय अनुमेने। सापि सहसा समुत्थाय तस्माद् वेश्मनो निरगात्।

व्याख्या

अथ प्राप्ते उपस्थिते लग्नदिवसे विवाहदिवसे, निर्वृत्तोद्वाहमङ्गला सम्पन्नशुभपरिणयव्यापारा, सा गत्वा पतिगृहं स्वामिगृहम्, नीत्वा अतिवाहयित्वा उत्सवेन आनन्देन, वासरं दिवसम्, निशि च पत्या समं शयनीयगृहम् अध्यास्त प्रविष्टवती। तत्र शय्यानिषण्णापि शय्यायाम् उपविष्टापि शय्यास्थितापि, असम्मुखी विमुखी पत्यौ पराङ्मुखी इत्यर्थः, समुद्रदत्तस्य तस्याः पत्युः परिष्वङ्गम् आलिङ्गनम्, न प्रत्यपद्यत न प्राप्नोत्, पतिं पश्चात्कृत्य स्थितत्वात् तस्य आलिङ्गनादिकं न बहु अमन्यत इत्यर्थः। तेन अनुनीयमाना अनुरोधिता अपि सा यदा उदश्रुः अश्रुयुक्ता बभूव अजायत, तदा सः समुद्रदत्तः नाहम् अस्याः अभिमतः अस्मि प्रार्थितः, प्रियः इत्यर्थः नास्मि इति हृदाकरोत् हृदा मनसा अकरोत् स्वीकृतवान्, अवादीत् उक्तवान् च सुन्दरि, यदि ते तव अहं नाभिमतः, तत्ते यः अभिमतः, तं सेवितुं गच्छ। तदाकर्ण्य सा नतमुखी शनैः अवादीत् नाथ, स्वामिन्, त्वं मे प्राणाधिकः प्रेयान् प्रियतमः, किन्तु मे विज्ञप्तिम् एकां विज्ञापनम् एकम् शृणु, सहर्षं हर्षेण आनन्देन सह सहर्षम् सानन्दम्, प्रसन्नचेतसा इत्यर्थः मे मह्यम्, अभयं प्रयच्छ आश्वासं देहि, शपथं च कुरुष्व आर्यपुत्र इति पत्युः सम्बोधनम्, अवक्तव्यम् अनुच्चार्यम् अपि लज्जाकरत्वात् इति भावः, ते तुभ्यम्, वदामि विज्ञापयामि एवम् उक्तवती सा तथा तदेव भवतु, वक्तव्यम ते ब्रूहि, अभयं ददामि, शपथं च करोमि इत्येवंरूपम् इत्यर्थः। इति कृच्छ्रात् प्रतिपद्यमानं अङ्गीक्रियमाणम् तं समुद्रदत्तम्, सविषादं सलज्जं सभयं च अवादीत् नाथ, एकदा एकाकिनीं गृहोद्याने मां दृष्ट्वा धर्मदत्तः नाम मम भ्रातुः सखा मित्रम्, युवा स्मरातुरः कामार्तः, माम् अरुणत् रुद्धवान्। अहं परीवादम् अपवादम् लोकनिन्दाम् इति यावत्। पितुः कन्यादानफलं च रक्षन्ती पालयन्ती हठप्रवृत्तस्य तस्य वाचम् वाक्यम्, अयच्छम् अददाम् अङ्गीकृतवती इत्यर्थः। यत् पूर्वं विवाहिता त्वाम् उपेष्यामि, ततः पतिम् इति। तत् प्रभो, मे सत्यं प्रतिपालय रक्ष, अनुमन्यस्व अनुमतिं प्रयच्छ, मां तदन्तिकगमनाय तस्य समीपगमनार्थम्, तन्निकटं गत्वा क्षणेन आगमिष्यामि, न हि आबाल्यसेवितं सत्यम् अतिक्रमितुं शक्नोमि पारयामि। इति तस्याः वचोवज्रपातेन वाग्बाणेन, सहसा हतः समुद्रदत्तः सत्येन बद्धः क्षणम् अचिन्तयत् चिन्तितवान्, अहो, धिक्, इयम् अन्यरक्ता पतिव्यतिरिक्तं प्रीणाति, एतया ध्रुवम् एव गन्तव्यं गमनीयम्, तत् कथं सत्यं हन्मि लङ्घयामि। यातु गच्छतु इयम्, कः अस्याः परिग्रहः ग्रहणम्। अस्याः ग्रहणे किं प्रयोजनम्। नैव एनाम् पत्नीत्वेन गृह्णामी इत्यर्थः। इति आलोच्य विवेचनाम् कृत्वा, तां यथेष्टगमनाय स्वाभिष्टस्थाने गमनार्थम्, अनुमेने अनुमतिम् अयच्छत्। सा अपि सहसा हठात् समुत्थाय उत्थिता तस्मात् वेश्मनः गृहात् निरगात् बहिः अगच्छत् इत्यर्थः।

सरलार्थः

विवाहात् परं वासररात्रौ पत्युः सकाशं गत्वा सा क्रन्दितुम् आरब्धवती। यदा समुद्रदत्तः कारणं पृष्टवान् तदा सा स्वस्याः विवाहात् पूर्ववृत्तान्तम् तस्मै कथितवती। समुद्रदत्तः दृष्टवान् यत् सा अन्यं प्रीणाति। इयम् माम् न प्रीणाति। अतः अस्याः अवरोधः मास्तु। तस्माद् स गमने शीघ्रम् अनुमतिं दत्तवान्। सापि अनुमतिम् प्राप्य धनदत्तसमीपम् गन्तुम् गृहात् झटिति निर्गता।

व्याकरणविमर्शः

- लग्नदिवसे - लग्नेन शुभराशीनाम् उदयेन हेतुना दिवसे विवाहार्थनिर्दिष्टदिने लग्नदिवसे वैवाहिकशुभराशियुक्तदिने इति तृतीयातत्पुरुषसमासः।
- निर्वृत्तोद्वाहमङ्गला - निर्वृत्तं निष्पन्नम् उद्वाहाय विवाहाय विवाहकर्मसम्पादनाय इत्यर्थः, मङ्गलम् शुभकर्म यस्याः सा निर्वृत्तोद्वाहमङ्गला सम्पन्नशुभपरिणयव्यापारा।
- उदश्रुः - उत् उद्गतम् अश्रु नेत्रोदकं यस्याः सा उदश्रुः दृष्टनेत्रनीरा रोदनोन्मुखी इति यावत् इति बहुव्रीहिसमासः।
- हठप्रवृत्तस्य – हठे बलात्कारे बलपूर्वकावरोधे इत्यर्थः, प्रवृत्तस्य उद्यतस्य हठप्रवृत्तस्य इति सप्तमीतत्पुरुषसमासः। प्रसभम् माम् अवरोद्धुम् उपक्रान्तस्य तस्य धनदत्तस्य।
- वचोवज्रपातेन - वचांसि वाक्यानि वज्रम् अशनिरिव तस्य पातेन पतनेन वचोवज्रपातेन वाग्वज्राघातेन इत्यर्थः इति षष्ठी तत्पुरुषसमासः।
- अन्यारक्ता - अन्यस्मिन् पुरुषान्तरे पतिव्यतिरिक्ते रक्ता अनुरक्ता अनुरागिणी अन्यरक्ता परपुरुषासक्ता इति सप्तमीतत्पुरुषसमासः।

४.३.५) विभागः ४

अथ सा यान्ती मदनसेना निशि मार्गे एकाकिनी केनापि चौरेण प्रधाव्य वसनाञ्चलाद् रुरुधे, ऊचे च बिभ्यती सा- का त्वं सुभ्रु। क्व यासि। सावादीत्- मुञ्च माम्, किं तवानेन प्रसङ्गेन। कार्यमस्ति मे। ततश्चौरोऽब्रवीत्- सुन्दरि, चौरात् मत्तः कथं त्वं मुच्यसे। तदाकर्ण्य सावदत्- गृहाण मे आभरणानि। ततश्चौरः अभ्यधात्- शोभने, किमेभिरुत्पलैः। चन्द्रकान्ताननां जगदाभरणभूतां भवतीं नैवाहं त्यजामि। इति तेनोक्ता विवशा सा वणिङ्नन्दिनी निजवृत्तान्तमाख्याय तमेवं प्रार्थयामास- भद्र, क्षणम् अपेक्षस्व, यावत् सत्यमनुपालयामि। एतदाकर्ण्य चौरस्तां सत्यसन्धां मत्वा मुमोच, तस्थौ च तत्र तदागमं प्रतीक्षमाणः। सापि तस्य धर्मदत्तस्य वणिजोऽन्तिकमाजगाम। स च धर्मदत्तस्ताम् अभीष्टां प्राप्तां दृष्ट्वा यथावृत्तं पृष्ट्वा विचिन्त्य च क्षणमब्रवीत्- सुन्दरि, सत्येन ते पुष्टोऽस्मि, त्वया परस्त्रिया मे नास्ति प्रयोजनम्। यावत् त्वां कश्चिन्नेक्षते, तावत् यथागतं गम्यताम् इति तेन त्यक्ता सा तथेति तद्गेहात् प्रत्यागमत्। अथ पथि चौरस्य प्रतिपालयतो निकटं प्राप्य- ब्रूहि, कस्ते वृत्तान्तस्तत्र गतायाः। इति पृच्छते तस्मै सा तेन वणिजा यथोक्तं तत् सर्वमाख्यातवती। ततः चौरस्तामवादीत्- यद्येवं, तत् मयापि सत्यतुष्टेन विमुक्तासि, साम्प्रतं साभरणा गृहं व्रज इति। एवं तेनापि सन्त्यक्ता रक्षिता अनृणा अलुप्तशीलमुदिता पत्युरन्तिकमाययौ। तत्र गुप्तं प्रविष्टा प्रहृष्टैवागता पृष्टा तस्मै पत्ये तत् सर्वं यथावद् अवर्णयत्। सोऽपि अम्लानमुखकान्तिमसम्भोगलक्षणाम् अनष्टचारित्रां सत्यपालनगताम् अदुष्टमानसां सम्भाव्य अभिनन्द्य च तया सह यथासुखं तस्थौ।

व्याख्या

अथ सा यान्ती गच्छन्ती, मदनसेना निशि रात्रौ मार्गे एकाकिनी निःसङ्गिनी, केनापि चौरेण प्रधाव्य धावित्वा वसनाञ्चलाद् वस्त्रप्रान्तदेशम् आकृष्य इत्यर्थः। रुरुधे प्रतिरुद्धा, ऊचे उक्ता च बिभ्यती त्रस्ता सा का त्वं सुभ्रु सुन्दरभ्रूसमन्विते, क्व कुत्र यासि गच्छसि। सा अवादीत् अवदत्, मुञ्च त्यज, मां किं तवानेन प्रसङ्गेन व्यापारेण। कार्यम् अस्ति मे। ततः चौरः अब्रवीत् उक्तवान्, सुन्दरि, चौरात् मत्तः कथं त्वं मुच्यसे मुक्तिं प्राप्स्यसि। तदाकर्ण्य सा अवदत् गृहाण मे आभरणानि सुवर्णानि। ततः चौरः अभ्यधात् उक्तवान् शोभने, किम् एभिः उत्पलैः प्रस्तरैः। चन्द्रकान्ताननां इन्दुसुन्दरमुखीम् जगदाभरणभूतां भवतीं नैव अहं त्यजामि त्यक्तुं शक्नोमि। इति तेन उक्ता विवशा व्याकुला किमपि कर्तुम् असमर्था, सा वणिङ्नन्दिनी निजवृत्तान्तम् आख्याय उक्त्वा, तम् एव प्रार्थयामास प्रार्थितवती भद्र, क्षणम् अपेक्षस्व अपेक्षां कुरु, यावत् सत्यम् अनुपालयामि, इहस्थस्यैव अत्रैव वर्तमानस्य, ते तव, पार्श्वं समीपम्, सत्वरं शीघ्रम्, एष्यामि आगमिष्यामि, नाहम् इमां गिरम् वाचम्, उल्लङ्घयिष्यामि अन्यथा करिष्यामि। एतद् आकर्ण्य चौरः तां सत्यसन्धां मत्वा बुद्ध्वा, मुमोच मुक्तिम् अयच्छत्, तस्थौ आसीत् च तत्र तदागमं प्रतीक्षमाणः प्रतीक्षां कुर्वन्। सा अपि तस्य धर्मदत्तस्य वणिजः व्यापारिणः, अन्तिकं समीपम्, आजगाम आगतवती। स च धर्मदत्तः तां अभीष्टाम् ईप्सिताम्, प्राप्तां लब्धाम्, दृष्ट्वा यथावृत्तं वृत्तान्तम्, पृष्ट्वा विचिन्त्य चिन्तनं कृत्वा च क्षणम् अब्रवीत् उक्तवान् सुन्दरि, सत्येन सत्यपालनेन ते तुष्टः प्रीतः अस्मि त्वया परस्त्रिया परपत्न्या, मे नास्ति प्रयोजनम् आवश्यकता, यावत् त्वां कश्चित् नेक्षते न पश्यति, तावत् यथागतं गम्यतां गच्छतु, इति तेन त्यक्ता सा तथा येन प्रकारेण पथा वा आगतवती तेनैव प्रकारेण पथा वा तद्गेहात् प्रत्यागमत् प्रत्यागतवती।

अथ पथि चौरस्य प्रतिपालयतः प्रतीक्षमाणस्य, निकटं समीपम् प्राप्य ब्रूहि वद, कस्ते वृत्तान्तः तत्र गतायाः गतवत्याः इति पृच्छते तस्मै सा तेन वणिजा यथोक्तं तत् सर्वम् आख्यातवती उक्तवती। ततः चौरः ताम् अब्रवीत् उक्तवान् यदि एवं तत् तद्धेतोः, मया अपि सत्यतुष्टेन सत्येन सत्यधर्मसंरक्षणेन तुष्टः प्रीतः तेन सत्यतुष्टेन सत्यपालनहेतुकसन्तुष्टेन विमुक्ता मुक्ता असि त्वम् इति शेषः, साम्प्रतम् अधुना साभरणा आभरणयुता गृहं स्वस्याः आवासम् व्रज गच्छ इति। एवं तेन अपि सन्त्यक्ता विमुक्ता, रक्षिता अनृणा प्रतिज्ञा-ऋणमुक्ता, अलुप्तशीलमुदिता निजसतीत्वसंरक्षणप्रीता इत्यर्थः, पत्युः भर्तुः, अन्तिकं समीपम्, आययौ आगतवती तत्र गुप्तं सुरक्षितम् अन्यैः अदृष्टम् यथा तथा इत्यर्थः। प्रविष्टा प्रहृष्टा स्मिता एव आगता, पृष्टा पत्या इति शेषः। तस्मै पत्ये तत् सर्वं सकलम्, यथावद् अवर्णयत् वर्णितवती सः अपि अम्लानमुखकान्तिं अकलङ्कचारित्रतया हृष्टवदनाम् , ताम् असम्भोगलक्षणां चम्बननखक्षतादिसम्भोगलक्षणवर्जिताम्, अनष्टचारित्रां अकलङ्कितस्वभावाम्, सत्यपालनगतां प्रतिज्ञारक्षणार्थमेव प्रस्थिताम्, अदुष्टमानसां विशुद्धहृदयाम्, सम्भाव्य वितर्क्य, अभिनन्द्य प्रशस्य सन्तोष्य वा, च तया सह यथासुखं सुखेन, तस्थौ कालं यापितवान् इत्यर्थः।

सरलार्थः

परं यदा सा धर्मदत्तस्य समीपं आगच्छन्ती आसीत् तदा मार्गे एकः चौरः समागतः। सः अपि तां गन्तुम् अनुमतिं न ददाति स्म। तदा धर्मदत्तात् प्रत्यागमनसमये तस्य समीपम् आगमिष्यति इत्युक्त्वा सा

ततः निर्गत्य धर्मदत्तस्य निकटं गतवती। एतेषु दिनेषु गतेषु धर्मदत्तस्य कामपीडा शान्ता जाता। अपि च सा परपत्नी। तस्माद् सः तां स्वपत्युः समीपं गमनाय उक्तवान्। तदा तस्य सकाशात् आगमनसमये चौरसमीपं गतवती। चौरः तस्याः सत्यनिष्ठतां दृष्ट्वा प्रीतः सन् तां स्वगृहगमनाय उक्तवान्। परं यदा सा पत्युः समीपं गतवती तदा समुद्रदत्तः दृष्टवान् यत् तस्याः गात्रे कुत्रापि सम्भोगचिह्नं नास्ति। किञ्च सा सत्यपालनं कृतवती परन्तु स्वपित्रोः यथा अवमाननं न स्यात् तथा कृतवती। एतेन मदनसेनायाः उपरि समुद्रदत्तस्य प्रीतिः वर्धिता। सः तां सादरं स्वीकृतवान्।

व्याकरणविमर्शः

- सुभ्रु - सु सुष्ठु शोभने भ्रुवौ यस्याः सा सुभ्रूः तत्सम्बुद्धौ सुभ्रु सुन्दरभ्रूसमन्विते इत्यर्थः।
- चन्द्रकान्ताननाम् - चन्द्रवत् कान्तम् सुन्दरम् आननम् वदनम् यस्याः ताम् चन्द्रकान्ताननाम् इन्दुसुन्दरमुखीम् इति बहुव्रीहिसमासः।
- जगदाभरणभूताम् - जगताम् भुवनानाम् आभरणभूताम् अलङ्काररूपिणीम् जगदाभरणभूताम् लोकखलामभूतान्, अतीव सुरूपाम् इत्यर्थः इति षष्ठीतत्पुरुषसमासः।
- सत्यसन्धाम् - सत्या अमृषा सन्धा प्रतिज्ञा यस्याः तादृशीम् सत्यसन्धाम् यथार्थवादिनीम् इति यावत् इति बहुव्रीहिसमासः।
- अनृणा - नास्ति ऋणम् देयम् प्रतिज्ञापालनरूपम् अवश्यपरिशोधनीयमित्यर्थः यस्याः सा अनृणा प्रतिज्ञा-ऋणमुक्ता इति बहुव्रीहिसमासः।
- अलुप्तशीलमुदिता - अलुप्तेन अविनष्टेन शीलेन सद्वृत्तेन चारित्र्येण हेतुना इत्यर्थः, मुदिता हृष्टा इति तृतीयातत्पुरुषसमासः। यद्वा अलुप्तम् शीलम् यस्याः सा अलुप्तशीला सा च असौ मुदिता चेति कर्मधारयसमासः।
- अम्लानमुखकान्तिम् - अम्लाना अमलिना प्रफुल्ला इति यावत्, मुखकान्तिः मुखशोभा यस्याः ताम् अम्लानमुखकान्तिम् अकलङ्कचारित्रतया हृष्टवदनाम् इति बहुव्रीहिसमासः।
- असम्भोगलक्षणाम् - न विद्यते सम्भोगस्य रतस्य पुंसंसर्गस्य इत्यर्थः, लक्षणम् चिह्नम् विशृङ्खलवेशादिकम् इति यावत्, यस्याम् यस्या वा ताम् असम्भोगलक्षणाम् अदृष्टशृङ्गारचिह्नाम् यथापूर्ववेशाम् इति यावत् इति बहुव्रीहिसमासः।
- अनष्टचारित्राम् अनष्टम् अस्खलितम् चारित्रम् सद्वृत्तम् सत्स्वभावः इत्यर्थः, यस्याः ताम् अनष्टचारित्राम् अकलङ्कितस्वभावाम् इति बहुव्रीहिसमासः।
- सत्यपालनगताम् - सत्यस्य शपथस्य पालनाय रक्षणाय गताम् प्रयाताम् सत्यपालनगताम् प्रतिज्ञारक्षणार्थमेव प्रस्थिताम् न तु अभिसारार्थम् इति भावः इति चतुर्थीतत्पुरुषसमासः।
- अदुष्टमानसाम् - अदुष्टम् पवित्रम् मानसम् चित्तम् यस्याः ताम् अदुष्टमानसाम् विशुद्धहृदयाम् इति बहुव्रीहिसमासः।

४.३.६) विभागः - ५

इति कथामुक्त्वा स वेतालस्तं भूपं पृच्छति स्म- राजन्, पूर्वोक्तं शापमनुस्मृत्य ब्रूहि, एषां चौरवणिजां मध्ये कः त्यागी। इति। तदाकर्ण्य स राजा मौनं विहाय तं वेतालमाह स्म- एषां चौरस्त्यागी, न पुनरुभौ तौ वणिजौ। यो हि पतिस्ताम् अत्यज्यां विवाह्यापि अजहात्, स कुलजः सन् अन्यासक्तां भार्यां जानन् कथं वहति। योऽपि अपरः, स भयात्। अथवा कालेन जीर्णासक्तिवेगात् तामत्याक्षीत्। चौरस्तु गूढचारी निरपेक्षः पापी, प्राप्तं साभरणं स्त्रीरत्नं यदमुञ्चत्, तेन स एव त्यागी इति। एतदाकर्ण्यैव स वेतालः पूर्ववत् स्वं पदमगात्, राजापि पुनस्तमानेतुं सयत्नोऽभवत्।।

व्याख्या

इति कथाम् उपाख्यानम्, उक्त्वा स वेतालः तं भूपं विक्रमादित्यम्, पृच्छति स्म राजन्, पूर्वोक्तं प्राक् कथितं शापमनुस्मृत्य शापं स्मृत्वा ब्रूहि वद, एषां चौरवणिजां चौरस्य तथा समुद्रदत्तधर्मदत्ताख्यवणिग्द्वयोश्च मध्ये कः त्यागी त्यागशीलः। तद् आकर्ण्य स राजा मौनं विहाय त्यक्त्वा, तं वेतालम् आह स्म उक्तवान् एषां चौरः त्यागी, न पुनः उभौ तौ वणिजौ। यः हि पतिः ताम् अत्यज्यां विवाह्य विवाहं कृत्वा अपि अजहात् त्यक्तवान्, स कुलजः सत्कुलोत्पन्नः सन् अन्यासक्तां भार्यां जानन् कथं वहति गृह्णाति इत्यर्थः, मोचयितुम् शक्नोति इति यावत्। केन प्रकारेण स्थापयति। यः अपि अपरः धर्मदत्तः, स भयात्। अथवा कालेन जीर्णासक्तिवेगात् जीर्णः क्षीणः आसक्तिवेगः अनुरागातिशय्यम् तस्मात् जीर्णासक्तिवेगात् जीर्णः क्षीणः आसक्तिवेगः अनुरागातिशय्यम् तस्मात्, बहुकालादर्शनेन मन्दानुरागत्वात् ताम् अत्याक्षीत् त्यक्तवान्, चौरः तु गूढचारी गूढं गुप्तम् चरति भ्रमति इति गूढचारी निशाविहारी, निर्जनप्रदेशविहारी वा निरपेक्षः समाजसम्बन्धपरिशून्यः पापी, प्राप्तं साभरणं स्त्रीरत्नं ललनाश्रेष्ठं यद् अमुञ्चत् त्यक्तवान्, तेन स एव त्यागी इति एतद् आकर्ण्य एव स वेतालः पूर्ववत् स्वं स्वकीयम्, पदं स्थानम् शिंशपावृक्षम् इत्यर्थः, अगात् गतवान् राजा अपि पुनः तम् आनेतुं यत्नवान् अभवत् इत्यर्थः।

सरलार्थः

एवं कथां श्रावयित्वा वेतालः पृष्टवान् यत् चौर-समुद्रदत्त-धर्मदत्तानां मध्ये कः त्यागी इति। तदा विक्रमादित्यः उत्तरं दत्तवान् यत् चौरः एव त्यागी इति। यतो हि समुद्रदत्तः तां परस्मिन् पुरुषे अनुरक्तां ज्ञात्वा गमने अनुमतिं दत्तवान्। धर्मदत्तः परपत्न्याः उपभोगे पापं स्यात् इति भयेन तां स्वपत्युः निकटं गमनाय उक्तवान्। चौरस्य सा पत्नी अपि नासीत्, न वा तस्य मनसि पापभीतिः वर्तते। सा आभरणविशिष्टां रूपयौवनसम्पन्नां सुन्दरीं मदनसेनां प्राप्य अपि तां स्वगृहगमनाय उक्तवान्। तस्माद् सः एव त्यागी इति। ततः परं वेतालः विक्रमादित्यात् समीचीनम् उत्तरं प्राप्य पुनः शिंशपावृक्षं प्रति गतवान्।

४.३.७) द्वितीयकथायाः तात्पर्यार्थः

अत्र वेतालः विक्रमादित्यं प्रति कथां कथयित्वा सत्यमार्गावलम्बनस्य माहात्म्यं वर्णितवान्। सः कथायाम् एवम् उक्तवान् यत् अनङ्गपुरनामके नगरे अर्थदत्तनामकः वणिक् वसति स्म। तस्य पुत्री आसीत् मदनसेना, पुत्रश्च धनदत्तः इति। एकदा यदा सा उद्याने आसीत् तदा तस्याः भ्रातुः सखा धर्मदत्तः तां दृष्टवान्। तां प्राप्तुं सः इष्टवान्। ततः परं सा उक्तवती यत् समुद्रदत्तेन साकं तस्याः वाग्दानम् अभवत्। सः तस्याः वाक्यं कथमपि न शृणोति स्म। तदा सा तस्मै वचनं दत्तवती यत् विवाहात् परम् आदौ तस्य समीपम् आगमिष्यति, परं पत्युः समीपम् इति। एवं श्रुत्वा सन्तुष्टः सः गृहं गतवान्। परं यदा मदनसेनायाः विवाहः अभवत् तदा विवाहानन्तरं सा पत्युः अनुमतिं स्वीकृत्य धर्मदत्तस्य समीपम् आदौ आगच्छति तदा मार्गे एकः चौरः ताम् गृहीतवान्। तदा तस्यापि समीपं सा वचनं दत्तवती यत् सा प्रत्यागमनसमये तस्य समीपम् आगमिष्यति, तस्य वचनं श्रोष्यति च। परं यदा सा धर्मदत्तस्य समीपं गतवती तदा सः चिन्तितवान् यद् इयं परस्त्री। तस्मात् गृहगमनाय ताम् उक्तवान्। परं यदा चौरसमीपम् आगतवती तदा तस्याः सत्यपालनं दृष्ट्वा सः अपि तां गृहगमनाय उक्तवान्। परं तस्याः पतिः सकलं वृत्तान्तं श्रुत्वा तस्याः सतीत्वं च ज्ञात्वा आनन्दितः भूत्वा तां सानन्दम् स्वीकृतवान्। इमां कथां श्रावयित्वा वेतालः राजानम् अपृच्छत् यत् तेषां मध्ये त्यागी कः इति। तदा राजा उक्तवान् यत् धर्मदत्तः पापभयात् तां गृहगमनाय उक्तवान्। तस्याः पतिः अन्यरक्ता इति मत्वा तां गमनाय अनुमतिं दत्तवान्। परन्तु चौरः तस्याः सत्यतां दृष्ट्वा तां गृहं प्रेषितवान्। तस्मात् सः चौरः एव प्रकृतत्यागी इति। समीचीनम् उत्तरं प्राप्य वेतालः पुनः श्मशानं प्रति गतवान्।

पाठगतप्रश्नाः-२

१. वेतालः कुत्र प्रतिवसति स्म।

२. अनङ्गपुरस्य नृपस्य नाम किम्।

३. वणिजः नाम किम् आसीत्।

४. वणिजः पुत्रस्य नाम किम्।

५. धनदत्तस्य भगिन्याः नाम किम्।

६. कः मदनसेनायाः प्रेम्णि पतितः।

७. मदनसेनायाः पत्युः नाम किम्।

८. धर्मदत्तः कुतः मदनसेनां स्वपत्युः सकाशं गमनाय उक्तवान्।

९. किं दृष्ट्वा चौरः तां त्यक्तवान्।

१०. तेषां मध्ये कः त्यागी इति राज्ञः मतम्।

११. स्तम्भं स्तम्भेन मेलयत -

टिप्पणी

स्तम्भः १	स्तम्भः २
१. अनङ्गपुरस्य नृपः	धनदत्तः
२. वणिजः पुत्रः	अनङ्गपुरम्
३. धनदत्तस्य भगिनी	धर्मदत्तः
४. धनदत्तस्य सखा	वीरबाहुः
५. त्यागी	मदनसेना
६. मदनसेनायाः गृहम्	चौरः

१२. आसीद् वीरबाहुर्नाम सकलभूपालशिरः समभ्यर्चितशासनः .... इवापरः नृपतिः।

१३. अर्थदत्तः .... प्रतिवसति स्म।

१४. अर्थदत्तस्य .... नाम ज्येष्ठः पुत्रः।

१५. राजन्, श्रान्तः असि, तदिमां .... कथां शृणु।

१६. आसीद् .... नाम सकलभूपालशिरः पाकशासनः इवापरः नृपतिः।

१७. अनङ्गपुरे नगरे .... नाम महाधनः सार्थवाहः प्रतिवसति स्म।

१८. तस्य धनदत्तः नाम ज्येष्ठः पुत्रः कनीयसी च कन्या .... नाम समजायत।

१९. अहं कन्या, साम्प्रतं ते परदाराश्च, यतः अहं पित्रा .... वणिजे वाचा दत्ता।

२०. पिता मे चिरकाङ्क्षितं .... लभताम्।

२१. परभुक्ते कमले .... अपि किं रतिर्जायते।

२२. सुन्दरि, ... मत्तः कथं त्वं मुच्यसे।

२३. प्राप्तं साभरणं .... यद् अमुञ्चत्, तेन स एव त्यागी इति।

पाठसारः

अस्मिन् पाठे वेतालपञ्चविंशतिः इति ग्रन्थात् द्वे कथे स्वीकृते। अनयोः कथयोः पठनेन साहित्यगुणानां परिचयो भवति। किञ्च अत्र कन्यादानविषये सतातायाः रक्षणविषये किञ्च योग्यवरः कः इति विषये वर्णना विहिता। प्रथमकथायाम् अनङ्गरतिं प्राप्तुं चत्वारः आगताः - एकः ब्राह्मणः, एकः क्षत्रियः,एकः वैश्यः, एकः शूद्रश्च। तेषु कः तां प्राप्स्यति इति राजा पृष्टवान्। तदा राजा उक्तवान् यत् क्षत्रियः एव तां प्राप्तुं शक्नोति। अत्र कन्यादानं कस्मै क्रियते इति विषये चर्चा विहिता।

द्वितीयायां कथायां मदनसेना धर्मदत्तस्य समीपे वचनं दत्तवती। तस्मात् वचनसत्यतापालनाय स्वपतिमपि क्षणम् स्थापयित्वा वचनपालनार्थं गतवती। मध्ये मार्गे चौरः प्राप्तः। तस्मै अपि वचनं दत्तवती।

धर्मदत्तः चौरश्च तस्याः सत्यतारक्षणं दृष्ट्वा तां गृहं प्रति गमनाय उक्तवान्। पतिः अपि तस्याः सतीत्वं सत्यतारक्षणं दृष्ट्वा तां सहर्षम् स्वीकृतवान्। अत्र कस्मै अपि वचनं दीयते चेत् तस्य यथा कथञ्चित् रक्षणं विधेयम् इति उपदेशः प्राप्यते।

किमधिगतम्

१. सोत्साहघने हि वीरहृदये न जातु खेदः अन्तरं लभते।

२. न हि आबाल्यसेवितं सत्यम् अतिक्रमितुं शक्यते।

योग्यताविस्तारः

➢ **सन्दर्भग्रन्थपरिचयः**

चर्चया वर्धते विद्या। तस्मात् विद्यायाः यावत् अध्ययनं क्रियते तावत् सा विद्या सुदृढा भवति। वेतालपञ्चविंशतेः अध्ययनम् अनेन पाठेन सम्यग् भवति। अत्र अस्मिन् पाठे यदि अध्यातारः अधिकं पठितुम् इच्छन्ति तर्हि –

पण्डितदामोदरझामहोदयस्य व्याख्यासमेतं चौखम्बाविद्याभवनात् प्रकाशितं वेतालपञ्चविंशतिः इति ग्रन्थं पठेयुः।

तस्मिन् ग्रन्थे पञ्चविंशतिः कथाः वर्णिताः। किञ्च तस्मिन् ग्रन्थे हिन्दीभाषया एतेषां कथानां व्याख्यादिकम् अपि लभ्यते।

➢ **भावविस्तारः**

१. अस्मिन् पाठे विक्रमादित्यस्य धीरताविषये ज्ञायते। शतवारं कार्ये साफल्यं नायाति चेदपि पुनः एकवारं प्रयतनीयम्, तत्कार्यं नैव त्याज्यम् - इति विवेकः लभ्यते।

२. इमाः कथाः नाटकरूपेण मञ्चादिषु उपस्थापयितुं शक्यते। तेन भाषायाः विस्तारः अपि स्यात्, सर्वेषां ज्ञानमपि भवेत्।

३. एका पत्रिका प्राप्यते। तस्याः नाम चन्द्रमामा इति। तस्यां पत्रिकायां प्रत्येकं सख्यायां वेतालपञ्चविंशतेः कथाः प्रकाश्यन्ते। तत्र तत्सदृशाः अपि कथाः प्राप्यन्ते। तेन छात्राः अधिकतया कथाग्रन्थान् पठितुं शक्नुवन्ति।

४. वेतालपञ्चविंशतेः अनेकाः कथाः युट्युब-मध्ये चलच्चित्ररूपेण नाटकरूपेण वा प्राप्यन्ते। ताः अपि छात्राः द्रष्टुं शक्नुवन्ति।

टिप्पणी

५. विविधाः दूरदर्शनपरिचालकसंस्थाः धारावाहिकचलच्चित्ररूपेण प्रतिरविवासरं वेतालपञ्चविंशतेः कथाः दर्शयन्ति। ताः अपि सर्वे द्रष्टुं शक्नुवन्ति।

६. अत्र याः कथाः प्रदत्ताः तेषु कश्चन नायकः वर्तते। सः च कस्यचित् गुणस्य प्रकाशकः। तं गुणं यदि वयं स्वीकरिष्यामः, नायकः यथा व्यवहरति तथा अनुसरिष्यामः तर्हि अस्माकमेव लाभः स्यात्।

➢ भाषाविस्तारः

१. अत्र बहवः अल्पसमासयुक्ताः शब्दाः वर्तन्ते। तेषां तालिका करणीया। तेन परं तालिकायाः पठनेन नवीनशब्दानां ज्ञानं समासबोधसारल्यम् अपि जायते।

२. नवीनसुबन्तशब्दानां रूपाणि लेख्यानि।

३. नवीनतिङन्तशब्दानां लट्लकारे, लङ्लकारे, लृट्लकारे, विधिलिङ्लकारे, लुट्लकारे च रूपाणि पत्रमध्ये लिखित्वा अभ्यासः आवश्यकः।

४. ये अव्ययशब्दाः दृष्टाः तेषाम् अपि तालिका प्रस्तुतव्या। स्वयं यदा किमपि उत्तरं लिख्यते तदा एतेषां प्रयोगः करणीयः।

पाठान्तप्रश्नाः

१. राज्ञः वीरदेवस्य सन्तानप्राप्तिवृत्तान्तं तयोः नाम च लिखत।

२. चतुर्णां विज्ञानिनां परिचयं प्रदत्त।

३. विक्रमादित्यः कुतः उक्तवान् यत् खड्गधराय कन्या देया इति युक्तिसहितं वर्णयत।

४. कथं मदनसेना धर्मदत्ताय वचनदानाय बद्धा अभवत् सवृत्तान्तं वर्णयत।

५. तस्याः गमनवृत्तान्तान् वर्णयत।

६. चौरः किं विचिन्त्य किं च उक्त्वा तां स्वगृहगमनाय उक्तवान्।

७. विक्रमादित्यस्य मते कथं चौरः त्यागी, वर्णयत।

८. सत्यपालनं कुर्वत्याः मदनसेनायाः सतीत्वं कथं रक्षितमिति कथां वर्णयित्वा उपस्थापयत।

पाठगतप्रश्नानामुत्तराणि

उत्तराणि १

१. भूतसङ्कुलम्।

२. वीरदेवः।

३. पद्मावती इति नाम।

४. भोगवती इति नाम।

५. द्वापरयुगे।

६. उज्जयिनी इति नाम।

७. पद्मरतिः।

८. शिवस्य।

९. शूरदेवः।

१०. अनङ्गरतिः।

११. सुरूपः यः युवा पूर्णं विज्ञानं वेत्ति तादृशः।

१२. पञ्चफुट्टिकः।

१३. पञ्च।

१४. भाषाज्ञः।

१५. मृगादिपशूनां तथा पक्षिणाम्।

१६. खड्गधरः इति नाम।

१७. जीवदत्तः इति नाम।

१८. सः मृतं जन्तुं जीवयति स्म।

१९. क्षत्रियाय खड्गधराय।

२०. उत्साहघनं वीरहृदयम्।

२१. शिंशपान्तिकम्, वेतालम्।

२२. श्मशाने।

२३. उज्जयिनी।

२४. वीरदेवः।

२५. मन्दाकिन्याः।

२६. शूरदेवः।

२७. अनङ्गरत्याः।

२८. अतिहेपणम्।

२९. परितुष्टशङ्करोदिताम् - परितुष्टश्चासौ शङ्करश्चेति परितुष्टशङ्करः इति कर्मधारयसमासः, परितुष्टशङ्करेण उदिताम् परितुष्टशङ्करोदिताम् इति तृतीयातत्पुरुषसमासः।

३०. पञ्चफुट्टिकः।

३१. भाषाज्ञः।

३२. खड्गधरः।

३३. जीवदत्तः।

३४. शतधा।

३५. कालक्षेपाय।

३६. वीरहृदये।

३७. स्तम्भमेलनम्

१) भूतसङ्कुलम्।

२) पद्मावती।

३) पद्मरतिः।

४) द्वापरयुगे।

५) खड्गधरः।

६) वीरहृदयम्।

उत्तराणि २

३८. शिंशपावृक्षे।

३९. वीरबाहुः।

४०. अर्थदत्तः।

४१. धनदत्तः।

४२. मदनसेना।

४३. धनदत्तस्य सखा धर्मदत्तः।

४४. समुद्रदत्तः।

४५. परस्त्रीभोगजं पापं स्मृत्वा।

४६. चौरः।

४७. श्रान्तिहारिणीम्।

४८. स्तम्भमेलनम्

१. वीरबाहुः

२. धनदत्तः

३. मदनसेना

४. धर्मदत्तः

५. चौरः

६. अनङ्गपुरम्

४९. पाकशासनः

५०. अनङ्गपुरे।

५१. धनदत्तः।

५२. श्रान्तिहारिणीम्।

५३. वीरबाहुः।

५४. अर्थदत्तः।

५५. मदनसेना।

५६. समुद्रदत्ताय।

५७. कन्यादानफलम्।

५८. विमले।

५९. चौरात्।

६०. स्त्रीरत्नम्।

॥ इति चतुर्थः पाठः॥